विज्ञप्तौ तस्य कृते तत्रायमुपक्रमः श्रेयान् ॥ ६ ॥
सति धर्मिणि धर्माणां मीमांसा स्यादनन्यथा न्याय्यात् ॥
साध्यं वस्त्वविशिष्टं धर्मविशिष्टं ततः परं चापि ॥ ७ ॥
तत्त्वं सल्लाक्षणिकं सन्मात्रं वा यथा स्वतः सिद्धम् ॥
तस्मादनादिनिधनं स्वसहायं निर्विकल्पं च ॥ ८ ॥
इत्थं नोचेदसतः प्रादुर्भूतिर्निरंकुशा भवति ॥
परतः प्रादुर्भावो युतसिद्धत्वं सतो विनाशो वा ॥ ९ ॥
असतः प्रादुर्भावे द्रव्याणामिह भवेदनन्तत्वम् ॥
को वारयितुं शक्तः कुम्भोत्पत्तिं मृदाद्यभावेऽपि ॥ १० ॥
परतः सिद्धत्वे स्यादनवस्थालक्षणो महान् दोषः ॥
सोऽपि परः परतः स्यादन्यस्मादिति यतश्च सोऽपि परः
युतसिद्धत्वेऽप्येवं गुणगुणिनोः स्यात्पृथक्प्रदेशत्वम् ॥
उभयोरात्मसमत्वाल्लक्षणभेदः कथं तयोर्भवति ॥ १२ ॥
अथ ... सतो विनाशः स्यादिति पक्षोऽपि बाधितो भवति
... यतः कथंचिद्द्रव्ये सुधैः प्रतीयतेऽध्यक्षात् ॥ १३ ॥
... [illegible] ... पुंसा ॥
... [illegible] सत्त्वं चानुमन्तव्यम् ॥ १४ ॥
... भूतोऽपि च तथा न स्यान्निरंकुशा किन्तु ॥

सप्रतिपक्षा भवति हि स्वप्रतिपक्षेण नेतरेणेह ॥ १५ ॥
अत्राहैवं कश्चित्सत्ता या सा निरंकुशा भवतु ॥
परपक्षे निरपेक्षा स्वात्मनि पक्षेऽवलम्बिनी यस्मात् १६
तन्न यतो हि विपक्षः कश्चित्सत्त्वस्य वा सपक्षोऽपि ॥
द्वावपि नयपक्षौ तौ मिथो विपक्षौ विवक्षितापेक्षात् १७
अत्राप्याह कुदृष्टिर्यदि नयपक्षौ विवक्षितौ भवतः ॥
का नः क्षतिर्भवेतामन्यतरेणेह सत्त्वसंसिद्धिः ॥ १८ ॥
तन्न यतो द्रव्यार्थिकपर्यायार्थिकनयात्मकं वस्तु ॥
अन्यतरस्य विलोपे शेषस्यापीह लोप इति दोषः ॥१९॥
प्रतिपक्षमसत्ता स्यात्सत्तायास्तद्यथा तथा चान्यात् ॥
नानारूपत्वं किल प्रतिपक्षं चैकरूपतायास्तु ॥ २० ॥
एकपदार्थस्थितिरिह सर्वपदार्थस्थितेर्विपक्षत्वम् ॥
ध्रौव्योत्पादविनाशैस्त्रिलक्षणायास्त्रिलक्षणाभावः ॥ २१ ॥
एकस्यास्तु विपक्षः सत्तायाः स्याद्दो ह्यनेकत्वं ॥
स्यादप्यनन्तपर्ययप्रतिपक्षस्त्वेकपर्ययत्वं स्यात् ॥ २२ ॥
एकस्मिन्निह वस्तुन्यनादिनिधने च निर्विकल्पे च ॥
भेदनिदानं किं यद्येनैतज्जृम्भते वचस्त्विति चेत् ॥२३॥
अंशविभागः स्यादित्यखण्डदेशे महत्यपि द्रव्ये ॥

विष्कम्भस्य क्रमतो व्योम्नीवांगुलिवितस्तिहस्तादिः २४
प्रथमो द्वितीय इत्याद्यसंख्यदेशास्ततोऽप्यनन्ताश्च ॥
अंशा निरंशरूपास्तावन्तो द्रव्यपर्ययाख्यास्ते ॥ २५ ॥
पर्यायाणामेतद्धर्मं यत्त्वंशकल्पनं द्रव्ये ॥
तस्मादिदमनवद्यं सर्वं सुस्थं प्रमाणतश्चापि ॥ २६ ॥
एतेन विना चैकं द्रव्यं सम्यक्प्रपश्यतश्चापि ॥
को दोषो यद्भीतेरियं व्यवस्थैव साधुरस्त्विति चेत् २७
देशाभावे नियमात्सत्त्वं द्रव्यस्य न प्रतीयेत ॥
देशांशाभावेऽपि च सर्वं स्यादेकदेशमात्रं वा ॥ २८ ॥
तत्रासत्त्वे वस्तुनि न श्रेयस्तस्य साधकाभावात् ॥
एवं चैकांशत्वे महतो व्योम्नः प्रतीयमानत्वात् ॥ २९ ॥
किं चैतदंशकल्पनमपि फलवत्स्याद्यतोऽनुमीयेत ॥
कायत्वमकायत्वं द्रव्याणामिह महत्त्वममहत्त्वम् ॥ ३० ॥
भवतु विवक्षितमेतन्ननु यावन्तो निरंशदेशांशाः ॥
तल्लक्षणयोगादप्यणुवद्द्रव्याणि सन्तु तावन्ति ॥ ३१ ॥
नैवं यतो विशेषः परमः स्यात्पारिणामिकोऽध्यक्षः ॥
खण्डैकदेशवस्तुन्यखण्डितानेकदेशे च ॥ ३२ ॥
प्रथमोद्देशितपक्षे यः परिणामो गुणात्मकस्तस्य ॥

एकत्र तत्र देशे भवितुं शीलो न सर्वदेशेषु ॥ ३३ ॥
तदसत्प्रमाणबाधितपक्षत्वादक्षसंविदुपलब्धेः ॥
देहैकदेशविषयस्पर्शादिह सर्वदेशेषु ॥ ३४ ॥
प्रथमेतरपक्षे खलु यः परिणामः स सर्वदेशेषु ॥
एको हि सर्वपर्वसु प्रकम्पते ताडितो वेणुः ॥ ३५ ॥
एकप्रदेशवदपि द्रव्यं स्यात्खण्डवर्जितः स यथा ॥
परमाणुरेव शुद्धः कालाणुर्वा यथा स्वतः सिद्धः ॥ ३६
न स्याद्द्रव्यं क्वचिदपि बहुप्रदेशेषु खण्डितो देशः ॥
तदपि द्रव्यमिति स्यादखण्डितानेकदेशमदः ॥ ३७ ॥
अथ चैव ते प्रदेशाः सविशेषा द्रव्यसञ्ज्ञया भणिताः ॥
अपि च विशेषाः सर्वे गुणसञ्ज्ञास्ते भवन्ति यावन्तः ३८
तेषामात्मा देशो न हि ते देशात्पृथक्त्वसत्ताकाः ॥
न हि देशे हि विशेषाः किन्तु विशेषैश्च तादृशो देशः ३९
अत्रापि च संदृष्टिः शुक्लादीनामियं तनुस्तन्तुः ॥
न हि तन्तौ शुक्लाद्याः किन्तु सिताद्यैश्च तादृशस्तन्तुः ४०
अथ चेदित्थं देशो भिन्ना देशाश्रिता विशेषाश्च ॥
तेषामिह संयोगाद्द्रव्यं दण्डीव दण्डयोगाद्वा ॥ ४१ ॥
नैवं हि सर्वसङ्करदोषत्वाद्वा सुसिद्धदृष्टान्तात् ॥

तत्किं चेतनयोगादचेतनं चेतनं न स्यात् ॥ ४२ ॥
अथवा विना विशेषैः प्रदेशसत्त्वं कथं प्रमीयेत ॥
अपि चान्तरेण हेतोर्विशेषलक्ष्माऽवलक्ष्यते च कथम् ॥४३॥
अथ चैतयोः पृथक्त्वे हठादहेतोश्च मन्यमानेऽपि ॥
कथमिव गुणगुणिभावः प्रमीयते सत्समानत्वात् ॥ ४४ ॥
तस्मादिदमनवद्यं देशविशेषास्तु निर्विशेषास्ते ॥
गुणसञ्ज्ञकाः कथञ्चित्परिणतिरूपाः पुनःक्षणं यावत् ॥
एकत्वं गुणगुणिनोः साध्यं हेतोस्तयोरनन्यत्वात् ॥
तदपि द्वैतमिव स्यात्किं तत्र निबन्धनं तिति चेत् ॥४६ ॥
यत्किञ्चिदस्ति वस्तु स्वतः स्वभावे स्थितं स्वभावश्च ॥
अविनाभावी नियमाद्विवक्षितो भेदकर्ता स्यात् ॥ ४७ ॥
शक्तिर्लक्ष्मविशेषो धर्मो रूपं गुणः स्वभावश्च ॥
प्रकृतिः शीलं चाकृतिरेकार्थवाचका अमी शब्दाः ॥४८॥
देशस्यैका शक्तिर्या काचित्सा न शक्तिरन्या स्यात् ॥
क्रमतो वितर्क्यमाणा भवन्त्यनन्ताश्च शक्तयो व्यक्ताः॥४९॥
स्पर्शो रसश्च गन्धो वर्णो युगपद्यथा रसालफले ॥
प्रतिनियतेन्द्रियगोचरचारित्वात्ते भवन्त्यनेकेऽपि ॥ ५० ॥
तदुदाहरणं चैतज्जीवे यद्दर्शनं गुणश्चैकः ॥

तत्र ज्ञानं न सुखं चारित्रं वा न कश्चिदितरश्च ॥ ५१ ॥
एवं यः कोऽपि गुणः सोऽपि च न स्यात्तदन्यरूपो वा ॥
स्वयमुच्छलन्ति तदिमा मिथो विभिन्नाश्च शक्तयोऽनन्ताः ॥
तासामन्यतरस्या भवन्त्यनन्ता निरंशका अंशाः ॥
तरतमभागविशेषैरंशच्छेदैः प्रतीयमानत्वात् ॥ ५३ ॥
दृष्टान्तः सुगमोऽयं शुक्लं वाससस्ततोऽपि शुक्लतरम् ॥
शुक्लतमं च ततः स्यादंशाश्चैते गुणस्य शुक्लस्य ॥ ५४ ॥
अथवा ज्ञानं यावज्जीवस्यैको गुणोऽप्यखण्डोऽपि ॥
सर्वजघन्यनिरंशच्छेदैरिव खण्डितोऽप्यनेकः स्यात् ॥५५॥
देशच्छेदो हि यथा न तथा छेदो भवेद्गुणांशस्य ॥
विष्कम्भस्य विभागात्स्थूलो देशस्तथा न गुणभागः ॥
क्रमोपदेशश्चायं प्रवाहरूपो गुणः स्वभावेन ॥
अर्द्धच्छेदेन पुनश्छेत्तव्योऽपि च तदर्द्धछेदेन ॥ ५७ ॥
एवं भूयोभूयस्तदर्द्धछेदैस्तदर्द्धछेदैश्च ॥
यावच्छेत्तुमशक्यो यः कोऽपि निरंशको गुणांशः स्यात्
तेन गुणांशेन पुनर्गणिताः सर्वे भवन्त्यनन्तास्ते ॥
तेषामात्मा गुण इति न हि ते गुणतः पृथक्त्वसत्ताकाः ॥
अपि चांशः पर्यायो भागो हारो विधा प्रकारश्च ॥

भेदश्छेदो भंगः शब्दाश्चैकार्थवाचका एते ॥ ६० ॥
सन्ति गुणांशा इति ये गुणपर्यायास्त एव नाम्नाऽपि ॥
अविरुद्धमेतदेव हि पर्यायाणामिहांशधर्मत्वात् ॥ ६१ ॥
गुणपर्यायाणामिह केचिन्नामान्तरं वदन्ति बुधाः ॥
अर्थो गुण इति वा स्यादेकार्थादर्थपर्यया इति च ॥६२॥
अपि चोद्दिष्टानामिह देशांशैर्द्रव्यपर्ययाणां हि ॥
व्यञ्जनपर्याया इति केचिन्नामान्तरं वदन्ति बुधाः ॥६३॥
ननु मोघमेतदुक्तं सर्वं पिष्टस्य पेषणन्यायात् ॥
एकेनैव कृतं यत्स इति यथा वा तदंश इति वा चेत् ॥ ६४ ॥
तन्नैवं फलवत्त्वाद्द्रव्यादेशादवस्थितं वस्तु ॥
पर्यायादेशादिदमनवस्थितमिति प्रतीतत्वात् ॥ ६५ ॥
स यथा परिणामात्मा शुक्लादित्वादवस्थितश्च पटः ॥
अनवस्थितस्तदंशैस्तरतमरूपैर्गुणस्य शुक्लस्य ॥ ६६ ॥
अपि चात्मा परिणामी ज्ञानगुणत्वादवस्थितोऽपि यथा ॥
अनवस्थितस्तदंशैस्तरतमरूपैर्गुणस्य बोधस्य ॥ ६७ ॥
यदि पुनरेवं न भवति भवति निरंशं गुणांशवद्द्रव्यम् ॥
यदि वा कीलकवदिदं भवति न परिणामि वा भवेत्क्षणिकं
अथ चेदिदमाकूतं भवन्त्वनन्या निरंशका अंशाः ॥

तेषामपि परिणामो भवतु समांशो न तरतमांशः स्यात् ६९
एतत्पक्षचतुष्टयमपि दुष्टं दृष्टबाधितत्वाच्च ॥
तत्साधकप्रमाणाभावादिह सोऽप्यदृष्टान्तात् ॥ ७० ॥
द्रव्यत्वं किन्नाम पृच्छतीह कश्चिदिति सूरिः ॥
प्राह प्रमाणनयैरधिगतमिव लक्षणं तस्य ॥ ७१ ॥
गुणपर्ययवद्द्रव्यं लक्षणमेतत्सुसिद्धमविरुद्धम् ॥
गुणपर्ययसमुदायो द्रव्यं पुनरस्य भवति वाक्यार्थः ॥७२॥
गुणसमुदायो द्रव्यं लक्षणमेतावताऽप्युशन्ति बुधाः ॥
समगुणपर्यायो वा द्रव्यं कैश्चिन्निरूप्यते वृद्धैः ॥ ७३ ॥
अयमत्राभिप्रायो ये देशाः सद्गुणास्तदंशाश्च ॥
एकालापेन समं द्रव्यं नाम्ना त एव निःशेषम् ॥ ७४॥
न हि किञ्चित्सद्द्रव्यं केचित्सन्तो गुणाः प्रदेशाश्च ॥
केचित्सन्ति तदंशा द्रव्यं तत्सन्निपाताद्वा ॥ ७५ ॥
अथवाऽपि यथा भित्तौ चित्रं द्रव्ये तथा प्रदेशाश्च ॥
सन्ति गुणाश्च तदंशाः समवायित्वात्तदाश्रयाद्द्रव्यम् ॥७६॥
इदमस्ति यथा मूले स्कन्धः शाखा दलानि पुष्पाणि ॥
गुच्छाः फलानि सर्वाण्येकालापात्तदात्मको वृक्षः ॥ ७७ ॥
यद्यपि भिन्नोऽभिन्नो दृष्टान्तः कारकश्च भवतीह ॥

प्राग्गस्तथाऽप्यभिन्नः साध्ये चाग्निगुणात्मके द्रव्ये॥७८॥
भिन्नोऽप्यय दृष्टान्तो भिन्नं भिन्नं यथा दृढो घटे ॥
भिन्नः कारक इति वा कश्चित्धनवान्धनस्य योगेन ॥ ७९ ॥
दृष्टान्तश्चाभिन्ने वृत्ते शाखा यथा ग्रहे स्तम्भः ॥
अपि चाभिन्नः कारक इति दृष्टोऽयं यथा हि ज्ञानवान् ॥
समवायः समवायी यदि वा स्यात्सर्वथा तदेकार्थः ॥
समुदायो वक्तव्यो न चापि समवायिवानिति चेत् ॥ ८१ ॥
तन्न यतः समुदायो नियतं समुदायिनः प्रतीतत्वात् ॥
व्यक्तप्रमाणसाधितसिद्धिरवाद्धा सुसिद्धदृष्टान्तात् ॥ ८२
स्पर्शरसगन्धवर्णा लक्षणभिन्ना यथा रसालफले ॥
कथमपि हि पृथक्कर्तुं न तथा शक्यास्त्वखण्डदेशत्वात् ॥८३
अत एव यथा वाच्या देशगुणांशा विशेषरूपत्वात् ॥
वन्...या स्यादेकं द्रव्यं त एव सामान्यात् ॥८४ ॥
अनवस्थितस्तदे...मेकं वाक्यान्तरप्रवेशेन ॥
अपि चात्मा परिण... विशेषतो लक्षयन्ति बुधाः ॥ ८५ ॥
अनवस्थितस्तदंशस्तर... सद्द्रव्यलक्षणं हि यथा ॥
यदि पुनरेवं न भवति भ... देशसमं न तु व्यस्तैः ॥ ८६ ॥
यदि वा कीलकवदिदं भवा... द्रव्यपास्तपर्यायांशाः ॥
अथ चेदिदमाकूतं भवन्त्वनन्ता

नाम्ना सदिति गुणः स्यादेकोऽनेके च एकशः प्रोक्ताः ॥
लक्ष्यस्य लक्षणस्य च भेदविवक्षाश्रयात्सदेव गुणः ॥
द्रव्यार्थादेशादिह तदेव सदिति स्वयं द्रव्यम् ॥ ८८ ॥
वस्त्वस्ति स्वतःसिद्धं यथा तथा तत्स्वतश्च परिणामि ॥
तस्मादुत्पादस्थितिभंगमयं सदेतदिह नियमात् ॥ ८९ ॥
न हि पुनरुत्पादस्थितिभंगमयं तद्विनाऽपि परिणामात् ॥
असतो जन्मत्वादिह सतो विनाशस्य दुर्निवारत्वात् ॥९०
द्रव्यं ततः कथञ्चित्केनचिदुत्पद्यते हि भावेन ॥
व्येति तदन्येन पुनर्नैतद्द्वितयं हि वस्तुतया ॥ ९१ ॥
इह घटरूपेण यथा प्रादुर्भवतीति पिण्डरूपेण ॥
व्येति तथा युगपत्स्यादेतद्द्वितयं न मृत्तिकात्वेन ॥ ९२ ॥
ननु ते विकल्पमात्रमिह यदकिञ्चित्करं तदेवेति ॥
एतावताऽपि न गुणो हानिर्वा तद्विना यतस्त्विति चेत् ॥
तन्न यतो हि गुणः स्यादुत्पादादित्रयात्मके द्रव्ये ॥
तन्निह्नवे च न गुणः सर्वद्रव्यादिशून्यदोषत्वात् ॥ ९४ ॥
परिणामाभावादपि द्रव्यस्य स्यादनन्यथावृत्तिः ॥
तस्यामिह परलोको न स्यात्कारणमथापि कार्यं वा ९५
परिणामिनोऽप्यभावात्क्षणिकं परिणाममात्रमिति वस्तु ॥

प्रायस्तथाऽप्यभिन्नः साध्ये चास्मिन्गुणात्मके द्रव्ये॥७८॥
भिन्नोऽप्यथ दृष्टान्तो भित्तौ चित्रं यथा दधीह घटे ॥
भिन्नः कारक इति वा कश्चिद्धनवान्धनस्य योगेन ॥ ७९ ॥
दृष्टान्तश्चाभिन्ने वृक्षे शाखा यथा गृहे स्तम्भः ॥
अपि चाभिन्नः कारक इति वृक्षोऽयं यथा हि शाखावान् ॥
समवायः समवायी यदि वा स्यात्सर्वथा तदेकार्थः ॥
समुदायो वक्तव्यो न चापि समवायिवानिति चेत् ॥ ८१ ॥
तन्न यतः समुदायो नियतं समुदायिनः प्रतीतत्वात् ॥
व्यक्तप्रमाणसाधितसिद्धत्वाद्वा सुसिद्धदृष्टान्तात् ॥ ८२
स्पर्शरसगन्धवर्णा लक्षणभिन्ना यथा रसालफले ॥
कथमपि हि पृथक्कर्तुं न तथा शक्यास्त्वखण्डदेशत्वात् ॥८३
अत एव यथा वाच्या देशगुणांशा विशेषरूपत्वात् ॥
वक्तव्यं च तथा स्यादेकं द्रव्यं त एव सामान्यात् ॥८४ ॥
अथैतदेव लक्षणमेकं वाक्यान्तरप्रवेशेन ॥
निष्प्रतिपक्षविपक्षे विशेषणौ लक्षयन्ति बुधाः ॥ ८५ ॥
उत्पादस्थितिभङ्गैर्युक्तं सद्द्रव्यलक्षणं हि यथा ॥
एतैरेव समस्तैः पृक्तं सिद्धेत्समं न तु व्यस्तैः ॥ ८६ ॥
अयमर्थः प्रकृतार्थो ध्रौव्योत्पादव्ययास्त्रयश्चांशाः ॥

नाम्ना सदिति गुणः स्यादेकोऽनेके स एकशः प्रोक्ताः ॥
लक्षणस्य लक्ष्यस्य च भेदविवक्षाश्रयात्सदेव गुणः ॥
द्रव्यार्थादेशादिह तदेव सदिति स्वयं द्रव्यम् ॥ ८८ ॥
वस्त्वस्ति स्वतःसिद्धं यथा तथा तत्स्वतश्च परिणामि ॥
तस्मादुत्पादस्थितिभंगमयं सदेतदिह नियमात् ॥ ८९ ॥
न हि पुनरुत्पादस्थितिभंगमयं तद्विनाऽपि परिणामात् ॥
असतो जन्मत्वादिह सतो विनाशस्य दुर्निवारत्वात् ॥९०
द्रव्यं ततः कथञ्चित्केनचिदुत्पद्यते हि भावेन ॥
व्येति तदन्येन पुनर्नैतद्द्वितयं हि वस्तुतया ॥ ९१ ॥
इह घटरूपेण यथा प्रादुर्भवतीति पिण्डरूपेण ॥
व्येति तथा युगपत्स्यादेतद्द्वितयं न मृत्तिकात्वेन ॥ ९२ ॥
ननु ते विकल्पमाना इह यत्किञ्चित्करं तदेवेति ॥
एतावताऽपि न गुणो हानिर्वा तद्विना यतस्त्विति चेत् ॥
तन्न यतो हि गुणः स्यादुत्पादादित्रयात्मके द्रव्ये ॥
तत्सिद्धत्वे च न गुणः सर्वद्रव्यादिशून्यदोषत्वात् ॥ ९४ ॥
परिणामाभावादपि द्रव्यस्य स्यादनन्यथावृत्तिः ॥
तस्यामिह परलोको न स्यात्कारणमथापि कार्यं वा ९५
परिणामिनोऽप्यभावात्क्षणिकं परिणाममात्रमिति वस्तु ॥

तत्र यतोऽभिज्ञानादिव्यस्याप्यात्मनः प्रतीतित्वात् ॥२६॥
द्रव्यत्वस्य द्रव्यं क्षणमेकं यत्कथमिह पूर्वम् ॥
कालान्तरोऽस्त्यधुना तदन्यत्वे त्विति चेत् ॥ ९७ ॥
नम यतः परिणामादेकोऽर्थो यानयोर्द्वयोरेव ॥
अन्यतरे स्यादिति चेन्न मिथोऽभिव्यञ्जकत्वाद्वा ॥ ९८ ॥
तद्दर्शने यथा किल निर्गुणस्य च गुणस्य व्याप्तिः स्यात् ॥
द्रव्यत्वस्य च स्यादितरमुखे धौव्यत्वतः सिद्धम् ॥९९॥
अपि च गुणाः संलक्ष्यास्तेषामिह लक्षणं भवेत् धौव्यम् ॥
तस्माल्लक्ष्यं साध्यं लक्षणमिह साधनं प्रसिद्धत्वात् १००
वर्णान्तरमिह किल मधुरत्वादेरथवा व्याप्तिः ॥
द्रव्यत्वं यदि वा द्रव्यं परिणमनात्मकं वा स्यात् ॥ १ ॥
द्रव्यत्वमिति या इति वर्णान्ताः स्युः स्वभावकल्पन ॥
तेषां लक्षणमिह वा स्वभाव इह वा गुणस्यैवोत्पादस्य ॥
तत्र च गुणत्वं किमहो गुणः केनापि मतिमता युक्तिः ॥
अत्रापि सोदाहरणं कतिपयमिह लक्षणं गुणानां हि ॥ २ ॥
द्रव्याश्रया गुणाः स्युर्विशेषमात्रास्तु निर्विशेषाश्च ॥
करतलगतं यदेतैर्व्याख्यानादेव व्यक्तं वस्तु ॥ ३ ॥
अस्त्यत्र विरोधेन समवेताः सर्व विशेषा ते ॥

ते ज्ञानेन विभक्ताः क्रमतः श्रेणीकृता गुणा ज्ञेयाः ॥५॥
दृष्टान्तः शुक्लाद्या यथा हि समतन्तवः समं सन्ति ॥
बुद्ध्या विभज्यमानाः क्रमतः श्रेणीकृता गुणा ज्ञेयाः ॥६॥
नित्यानित्यविचारस्तेषामिह विद्यते ततः प्रायः ॥
विप्रतिपत्तौ सत्यां विवदन्ते वादिनो यतो बहवः ॥ ७ ॥
जैनानां मतमेतन्नित्यानित्यात्मकं यथा द्रव्यम् ॥
ज्ञेयास्तथा गुणा अपि नित्यानित्यात्मकास्तदेकत्वात् ॥८॥
तत्रोदाहरणमिदं किल तद्भावाव्ययाद्गुणा नित्याः ॥
तदभिज्ञानात्सिद्धं तल्लक्षणमिह यथा तदेवेदम् ॥ ९ ॥
ज्ञानं परिणामि यथा घटस्य चाकारतः पटाकृत्या ॥
किं ज्ञानत्वं नष्टं न नष्टमथ चेत्कथं न नित्यं स्यात् ॥१०॥
दृष्टान्तः किल वर्णो गुणो यथा परिणमन्रसालफले ॥
हरितात्पीतस्तत्किं वर्णत्वं नष्टमिति नित्यम् ॥ ११ ॥
वस्तु यथा परिणामि तथैव परिणामिनो गुणाश्चापि ॥
तस्मादुत्पादव्ययद्वयमपि भवति हि गुणानां तु ॥ १२ ॥
ज्ञानं गुणो यथा स्यान्नित्यं सामान्यवत्तयाऽपि यतः ॥
नष्टोत्पन्नं च तथा घटं विहायाथ पटं परिच्छिन्दत् १३
संदृष्टी रूपगुणो नित्यश्चाम्रेऽपि वर्णमात्रतया ॥

नष्टोत्पन्ने हरितात्परिणममानश्च पीतवत्त्वेन ॥ १५ ॥
ननु नित्या हि गुणा अपि भवन्त्वनित्यास्तु पर्ययाः सर्वे
तत्किं द्रव्यवदिह किल नित्यानित्यात्मकाः गुणाः प्रोक्ताः
सत्यं तत्र यतः स्यादिदमेव विवक्षितं यथा द्रव्ये ॥
न गुणेभ्यः पृथगिह तत्सदिति द्रव्यं च पर्ययाश्चेति १६
अपि नित्याः प्रतिसमयं विनाऽपि यत्नं हि परिणमन्ति गुणाः
स च परिणामोऽवस्था तेषामेव न पृथक्त्वसत्ताकः १७
ननु तदवस्थो हि गुणः किल तदवस्थान्तरं हि परिणामः
उभयोरन्तर्वर्तित्वादिह पृथगेतदेवमिदमिति चेत् ॥१८॥
तन्न यतः सदवस्थाः सर्वा आम्रेडितं यथा वस्तु ॥
न तथा ताभ्यः पृथगिति किमपि हि सत्ताकमन्तरं वस्तु
नियतं परिणामित्वादुत्पादव्ययमया य एव गुणाः ॥
टङ्कोत्कीर्णन्यायात्त एव नित्या यथास्वरूपत्वात् ॥ २० ॥
न हि पुनरेकेषामिह भवति गुणानां निरन्वयो नाशः ॥
अपरेषामुत्पादो द्रव्यं यत्तद्द्वयाधारम् ॥ २१ ॥
दृष्टान्ताऽऽभासोऽयं स्याद्धि विपक्षस्य मृत्तिकायां हि ॥
एके नश्यन्ति गुणा जायन्ते पाकजा गुणास्त्वन्ये ॥ २२
तत्रोत्तरमिति सम्यक् सत्तां तत्र च तथाविधायां हि ॥

किं पृथिवीत्वं नष्टं न नष्टमथ चेत्तया कथं न स्यात् २३
ननु केवलं प्रदेशाद्द्रव्यं देशाश्रया विशेषास्तु ॥
गुणसंज्ञका हि तस्माद्भवति गुणेभ्यश्च द्रव्यमन्यत्र ॥ २४
तन्न एव यथा सुघटं भङ्गोत्पादध्रुवत्रयं द्रव्ये ॥
न तथा गुणेषु तत्त्वादपि च व्यस्तेषु वा समस्तेषु २५
तन्न यतः क्षणिकत्वापत्तेरिह लक्षणाद्गुणानां हि ॥
तदभिज्ञानविरोधात्क्षणिकत्वं बाध्यतेऽध्यक्षात् ॥ २६ ॥
अपि चैवमेकसमये स्यादेकः कश्चिदेव तत्र गुणः ॥
तन्नाशादन्यतरः स्यादिति युगपच्च सन्त्यनेकगुणाः २७
तदसद्यतः प्रमाणदृष्टान्तादिव बाधितः पक्षः ॥
स यथा सहकारफले युगपद्वर्णादिविद्यमानत्वात् ॥ २८
अथ चेदिति दोषभयान्नित्याः परिणामिनस्त इति पक्षः॥
तत्किं स्याच्च गुणानामुत्पादादित्रयं समं न्यायात् ॥ २९
अपि पूर्वं च यदुक्तं द्रव्यं किल केवलं प्रदेशाः स्युः ॥
तत्र प्रदेशवत्त्वं शक्तिविशेषश्च कोऽपि सोऽपि गुणः ३०
तस्माद्गुणसमुदायो द्रव्यं स्यात्पूर्वसूरिभिः प्रोक्तम् ॥
अयमर्थः खलु देशो विभज्यमाना गुणा एव ॥ ३१ ॥
ननु चैवं सति नियमादिह पर्याया भवन्ति यावन्तः ॥

सर्वे गुणपर्याया वाच्या न द्रव्यपर्ययाः केचित् ॥ १२ ॥
तन्न यतोऽस्ति विशेषः सति च गुणानां गुणत्ववत्त्वेऽपि ॥
चिद्विषयया तथा स्यात्क्रियावती शक्तिरथ च भाववती
तत्र क्रियाप्रदेशो देशपरिस्पन्दलक्षणो वा स्यात् ॥
भावः शक्तिविशेषस्तत्परिणामोऽथ वा निरंशांशैः १४
यतरे प्रदेशभागास्ततरे द्रव्यस्य पर्यया नाम्ना ॥
यतरे च विशेषांशास्ततरे गुणपर्यया भवन्त्येव ॥ १५ ॥
तत्र एव यदुक्तचरं व्युच्छेदादित्रयं गुणानां हि ॥
अनवद्यमिदं सर्वं प्रत्यक्षादिप्रमाणसिध्दत्वात् ॥ १६ ॥
अथ चैतल्लक्षणमिह वाच्यं वाक्यान्तरप्रवेशेन ॥
आत्मा यथा चिदात्मा ज्ञानात्मा वा स एव चैकार्थः १७
तद्वाक्यान्तरमेतद्यथा गुणाः सहभुवोऽपि चान्वयिनः ॥
अर्थाश्चैकार्थत्वादर्थादेकार्थवाचकाः सर्वे ॥ १८ ॥
सह सार्धं च समं वा तत्र भवन्तीति सहभुवः प्रोक्ताः ॥
अयमर्थो युगपत्ते सन्ति न पर्यायवत्क्रमात्मानः ॥ १९ ॥
ननु सह समं मिलित्वा द्रव्येण च सहभुवो भवंत्विति चेत्
तन्न यतो हि गुणेभ्यो द्रव्यं पृथगिति यथा निषिद्धत्वात्
ननु चैवमतिव्याप्तिः पर्यायेष्वपि गुणानुषंगत्वात् ॥

पर्यायः पृथगिति चेत्सर्वं सर्वस्य दुर्निवारत्वात् ॥ ४१ ॥
अनुरित्यव्युच्छिन्नप्रवाहरूपेण वर्तते यद्वा ॥
अयतीत्ययगत्यर्थाद्धातोरन्वर्थतोऽन्वयं द्रव्यम् ॥ ४२ ॥
सत्ता सत्त्वं सद्वा सामान्यं द्रव्यमन्वयो वस्तु ॥
अर्थो विधिरविशेषादेकार्थवाचका अमी शब्दाः ॥ ४३ ॥
अयमन्वयोऽस्ति येषामन्वयिनस्ते भवन्ति गुणवाच्याः ॥
अयमर्थो वस्तुत्वात्स्वतः सपक्षा न पर्ययापेक्षाः ॥ ४४ ॥
ननु च व्यतिरेकित्वं भवतु गुणानां सदन्वयत्वेऽपि ॥
तदनेकत्वप्रसिद्धौ भावव्यतिरेकतः सतामिति चेत् ॥४५॥
तन्न यतोऽस्ति विशेषो व्यतिरेकस्यान्वयस्य चापि यथा ॥
व्यतिरेकिणो ह्यनेकेऽप्येकः स्यादन्वयी गुणो नियमात् ॥
स यथा चैको देशः ॥ भवति नान्यो भवति ॥ चाप्यन्यः ॥
सोऽपि न भवति स देशो भवति स देशश्च देशव्यतिरेकः ॥
अपि यश्चैको देशो यावदभिव्याप्य वर्तते क्षेत्रम् ॥
तत्तत्क्षेत्रं नान्यद्भवति तदन्यश्च क्षेत्रव्यतिरेकः ॥ ४८ ॥
अपि चैकस्मिन्समये यकाऽप्यवस्था भवेन्न साऽप्यन्या ॥
भवति च सापि तदन्या द्वितीयसमयेऽपि कालव्यतिरेकः ॥
भवति गुणांशः कश्चित्स भवति नान्यो भवति स चाप्यन्यः

सोऽपि न भवति तदन्यो भवति तदन्योऽपि भावव्यतिरेकः
यदि पुनरेकं न स्यात्स्यादपि चैवं पुनः पुनः सैषः ॥
एकांशदेशमात्रं सर्वं स्याच्चन बाधितत्वात्प्राक् ॥ ५१ ॥
अयमर्थः पर्यायाः प्रत्येकं किल यथैकशः प्रोक्ताः ॥
व्यतिरेकिणो ह्यनेकेन तथाऽनेकत्वतोऽपि सन्ति गुणाः ॥
किन्त्वेकशः स्वबुद्धौ ज्ञानं जीवः स्वसर्वसारेण ॥
अथ चैकशः स्वबुद्धौ दृग्वा जीवाः स्वसर्वसारेण ॥५२॥
तत एव यथाऽनेके पर्यायाः सैष नेति लक्षणतः
व्यतिरेकिणश्च न गुणास्तथेति सोऽयं न लक्षणाभावात् ॥
तल्लक्षणं यथा स्याज्ज्ञानं जीवो य एव तावांश्च ॥
जीवो दर्शनमिति वा तदभिज्ञानात्स एव तावांश्च ॥५६॥
एष क्रमः सुखादिषु गुणेषु वाच्यो गुरूपदेशाद्वा ॥
यो जानाति स पश्यति सुखमनुभवतीति स एव हेतोश्च ॥
अथ चोद्दिष्टं प्रागप्यन्वयिनः इति संज्ञया गुणा वाच्याः
तदपि न रूढिवशादिह किन्त्वर्थाद्यौगिकं तदेवेति ५७॥
स्यादुगताविति धातुस्तद्रूपोऽयं निरुच्यते तज्ज्ञैः ॥
अतएवोऽनुगतार्थादनादिसन्तानरूपतोऽपि गुणः ॥ ५८ ॥
अयमर्थः सन्ति गुणा अपि किल परिणामिनः स्वतः सिद्धाः

नित्यानित्यत्वादप्युत्पादादित्रयात्मकाः सम्यक् ॥ ५९ ॥
अस्ति विशेषस्तेषां सति च समाने यथा गुणत्वेऽपि ॥
साधारणास्त एके केचिदसाधारणा गुणाः सन्ति ॥ ६०
साधारणास्तु यतरे ततरे नाम्ना गुणा हि सामान्याः ॥
ते चासाधारणतया यतरे ततरे गुणा विशेषाख्याः ॥ ६१
तेषामिह वक्तव्ये हेतुः साधारणैर्गुणैर्यस्मात् ॥
द्रव्यत्वमस्ति साध्यं द्रव्यविशेषस्तु साध्यते त्वितरैः॥६२
सन्दृष्टिः सदिति गुणः स यथा द्रव्यत्वसाधको भवति ॥
अथ च ज्ञानं गुण इति द्रव्यविशेषस्य साधको भवति ॥
उक्तं हि गुणानामिह लक्ष्यं तल्लक्षणं यथाऽऽगमतः ॥
सम्प्रति पर्यायाणां लक्ष्यं तल्लक्षणं च वक्ष्यामः ॥ ६४ ॥
क्रमवर्तिनो ह्यनित्या अथ च व्यतिरेकिणश्च पर्यायाः ॥
उत्पादव्ययरूपा अपि च ध्रौव्यात्मकाः कथंचिच्च ॥ ६५
तत्र व्यतिरेकित्वं प्रायः प्रागेव लक्षितं सम्यक् ॥
अवशिष्टविशेषमितः क्रमतः संलक्ष्यते यथाशक्ति ॥ ६६
अस्त्यत्र यः प्रसिद्धः क्रम इति धातुश्च पादविक्षेपे ॥
क्रमति क्रम इति रूपस्तस्य स्वार्थानतिक्रमादेषः ॥ ६७
वर्तन्ते ते नयतो भवितुं शीलास्तथा स्वरूपेण ॥

यदि वा स एव वर्ती येषां क्रमवर्तिनस्त एवार्थात् ६८
अयमर्थः प्रागेकं जातं समुच्छिद्य जायते चैकः ॥
अथ नष्टे सति तस्मिन्नन्योऽप्युत्पद्यते यथा देशः ॥ ६९
ननु यथास्ति स भेदः शब्दकृतो भवतु वा तदेकार्थात् ॥
व्यतिरेकक्रमयोरिह को भेदः पारमार्थिकस्त्विति चेत् ७०
तन्न यतोऽस्ति विशेषः सदंशधर्मे द्वयोः समानेऽपि ॥
स्थूलेष्विव पर्यायेष्वन्तर्लीनाश्च पर्ययाः सूक्ष्माः ॥ ७१ ॥
तत्र व्यतिरेकः स्यात्परस्पराभावलक्षणेन यथा ॥
अंशविभागः पृथगिति सदृशांशानां सतामेव ॥ ७२ ॥
तस्माद्व्यतिरेकित्वं तस्य स्यात्स्थूलपर्ययः स्थूलः ॥
सोऽयं भवति न सोऽयं यस्मादेतावतैव संसिद्धिः ॥७३॥
विष्कम्भक्रम इति वा क्रमः प्रवाहस्य कारणं तस्य ॥
न विवक्षितमिह किञ्चित्तत्र तथात्वं किमन्यथात्वं वा ७४
क्रमवर्तित्वं नाम व्यतिरेकपुरस्सरं विशिष्टं च ॥
॥ भवति भवति न सोऽयं भवति तथाऽथ च तथा न भवतीति ॥ ७५ ॥
ननु तत्र किं प्रमाणं क्रमस्य साध्ये तदन्यथात्वे हि ॥
सोऽयं यः प्राक्स तथा यथेति यः प्राक्तु निश्चयादिति चेत्

अयमर्थः परिणामि द्रव्यं नियमाद्यथा स्वतःसिद्धम् ॥
प्रतिसमयं परिणमते पुनःपुनर्वा यथा प्रदीपशिखा ७७
इदमस्ति पूर्वपूर्वभावविनाशेन नश्यतोंऽशस्य ॥
यदि वा तदुत्तरोत्तरभावोत्पादेन जायमानस्य ॥ ७८ ॥
तन्न यतः प्रत्यक्षादनुभवविषयात्तथाऽनुमानाद्वा ॥
स तथेति च नित्यस्य न तथेत्यनित्यस्य प्रतीतत्वात् ७९
तदिदं यथा स जीवो देवो मनुजाद्भवन्नथाप्यन्यः ॥
कथमन्यथात्वभावं न लभेत स गोरसोऽपि नयात् ॥ ८०
ननु चैवं सत्यसदपि किञ्चिद्वा जायते सदेव यथा ॥
सदपि विनश्यत्यसदिव सदृशासदृशत्वदर्शनादिति चेत्
सदृशोत्पादो हि यथा स्यादुष्णः परिणमन् यथा वह्निः ॥
स्यादित्यसदृशजन्मा हरितात्पीतं यथा रसालफलम् ८२
नैवं यतः स्वभावादसतो जन्म न सतो विनाशो वा ॥
उत्पादादित्रयमपि भवति च भावेन भावतया ॥ ८३ ॥
अयमर्थः पूर्वं यो भावः सोऽप्युत्तरत्र भावश्च ॥
भूत्वा भवनं भावो नष्टोत्पन्नो न भाव इह कश्चित् ८४
दृष्टान्तः परिणामी जलप्रवाहो य एव पूर्वस्मिन् ॥
उत्तरकालेऽपि तथा जलप्रवाहः स एव परिणामी ८५

यत्र विभक्तत्वं नानेकत्वनिरूपणात्मकपादेव ॥
अवगाहनगुणयोगाद्देशांशानां समावेश ॥ ८६ ॥
दृष्टान्तो जीवस्य लोकासंख्यातमात्रदेशाः स्युः ॥
हानिर्वृद्धिस्तेषामवगाहविशेषतो न तु द्रव्यात् ॥ ८७ ॥
यदि वा प्रदीपरोचिर्यथा प्रमाणादवस्थितं चापि ॥
अतिरिक्तं न्यूनं वा गृहभाजनविशेषतोऽवगाहात् ॥८८॥
अंशानामवगाहे दृष्टान्तः स्वांशसंस्थितं ज्ञानम् ॥
अतिरिक्तं न्यूनं वा ज्ञेयाकृति तन्मयान्न तु स्वांशैः ८९
नहि वै यथा हि पीठके परिच्छिन्नैरपि परमाणम् ॥
यदि वा सर्वे लोके व्यापकभावेन लोकमात्रं स्यात् ९०
न यथास्कंधेऽपि गुणः केवलानां विनश्यतो नाशः ॥
लोकाकाशेऽपि गुणो निजभागानां न वा व्याप्तिः ९१
छिन्नेऽपि च कोऽपि गुणोऽनिर्वचनीयः स्वतः सिद्धः ॥
तस्मात् वा गुणपर्यायेति गुणत्वयतः स्वानुभूतिरूपो वा ॥
ननु चैवं तन्मात्रं गुणादवस्थितं न तत्परिणाम ॥
अपि चांशानां किल क्षणों न कर्त्तुं तत्सम्मात् ॥९२॥
अपि च गुणः स्वांशानामपकर्षे दुर्बलः कथं न स्यात् ॥
उत्कर्षे च सर्वात्मे तदंशतो दुर्बलो बलवानपि ॥ ९३

तत्र यतः परिणामि द्रव्यं पूर्वं निरूपितं सम्यक् ॥
उत्पादादित्रयमपि सुघटं नित्येऽथ नाप्यनित्येऽर्थे ॥९५॥
जाम्बूनदे यथा सति जायन्ते कुण्डलादयो भावाः ॥
अथ सत्सु तेषु नियमादुत्पादादित्रयं भवत्येव ॥ ९६
अनया प्रक्रियया किल बोद्धव्यं कारणं फलं चैव ॥
यस्मादेवास्य सतस्तद्द्वयमपि भवत्येतत् ॥ ९७ ॥
आस्तामसदुत्पादः सतो विनाशस्तदन्वयादेशात् ॥
स्थूलत्वं च कृशत्वं न गुणस्य च निजप्रमाणत्वात् ॥९८
इति पर्यायाणामिह लक्षणमुक्तं यथास्थितं चात्र ॥
उत्पादादित्रयमपि प्रत्येकं लक्ष्यते यथाशक्ति ॥ ९९ ॥
उत्पादस्थितिभंगाः पर्यायाणां भवन्ति किल न सतः
ते पर्याया द्रव्यं तस्माद्द्रव्यं हि तत्त्रितयम् ॥ २०० ॥
तत्रोत्पादोऽवस्था प्रत्यग्रं परिणतस्य तस्य सतः ॥
सदसद्भावनिबद्धं तदतद्भावत्ववन्नयादेशात् ॥ १ ॥
अपि च व्ययोऽपि न सतो व्ययोऽप्यवस्थाव्ययः सतस्तस्य
प्रध्वंसाभावः स च परिणामित्वात्सतोऽप्यवश्यं स्यात्
ध्रौव्यं सतः कथञ्चित्पर्यायार्थाच्च केवलं न सतः ॥
उत्पादव्ययवदिदं तच्चैकांशं न सर्वदेशं स्यात् ॥ २ ॥

तद्भावाव्ययमिति वा ध्रौव्यं तत्रापि सम्यगयमर्थः ॥
यः पूर्वं परिणामो भवति स पश्चात्स एव परिणामः ४.
पुष्पस्य यथा गन्धः परिणामः परिणमंश्च गन्धगुणः ॥
नापरिणामी गन्धो न च निर्गन्धाद्धि गन्धवत्पुष्पम् ॥५॥
तत्रानित्यनिदाने ध्वंसोत्पादद्वयं सतस्तस्य ॥
नित्यनिदानं ध्रुवमिति तत्त्रयमप्यंशभेदः स्यात् ॥ ६ ॥
न च सर्वथा हि नित्यं किञ्चित्सत्त्वं गुणो न कश्चिदिति
तस्मादतिरिक्तौ द्वौ परिणतिमात्रौ व्ययोत्पादौ ॥ ७ ॥
सर्वं विप्रतिषिद्धं भवति यथा सति गुणो न परिणामः ॥
नापि द्रव्यं न सदिति पृथक्त्वदेशानुषंगत्वात् ॥ ८ ॥
अपि चैतद्दूषणमिह यन्नित्यं तद्धि नित्यमेव तथा ॥
यदनित्यं तदनित्यं नैकस्यानेकधर्मत्वम् ॥ ९ ॥
अपि चैकमिदं द्रव्यं गुणोऽयमेवेति पर्ययोऽयं स्यात् ॥
इति कालनियतो भेदो न स्याद्व्याप्त्यन्तरान्वयनियमात् ॥
ननु भवतु वस्तु नित्यं गुणाश्च नित्या भवन्तु वार्धिरिव
भावाः कल्लोलादिवदुत्पन्नध्वंसिनो भवन्त्विति चेत् ॥
तन्न यतो दृष्टान्तः प्रकृतार्थस्यैव बाधको भवति ॥
अपि तदनुक्तस्यास्य प्रकृतविरुद्धस्य साधकत्वाच्च १२

अर्थान्तरं हि न सतः परिणामेभ्यो गुणस्य कस्यापि ॥
एकत्वाज्जलधेरिव कलितस्य तरङ्गमालाभ्यः ॥ १३ ॥
किन्तु य एव समुद्रस्तरङ्गमाला भवन्ति ता एव ॥
यस्मात्स्वयं स जलधिस्तरङ्गरूपेण परिणमति ॥ १४ ॥
तस्मात्स्वयमुत्पादः सदिति ध्रौव्यं व्ययोऽपि वा सदिति
न सतोऽतिरिक्त एव हि व्युत्पादो वा व्ययोऽपि वा ध्रौव्यम्
यदि वा शुद्धत्वनयान्नाप्युत्पादो व्ययोऽपि न ध्रौव्यम् ॥
गुणश्च पर्यय इति वा न स्याच्च केवलं सदिति ॥ १६ ॥
अयमर्थो यदि भेदः स्यादुन्मज्जति तदा हि तत्त्रितयम्
अपि तत्त्रितयं निमज्जति यदा निमज्जति स मूलतो भेदः
ननु चोत्पादध्वंसौ द्वावप्यंशात्मकौ भवेतां हि ॥
ध्रौव्यं त्रिकालविषयं तत्कथमंशात्मकं भवेदिति चेत् १८
नैवं यतस्त्रयोंऽशाः स्वयं सदेवेति वस्तुनो न सतः ॥
नैवार्थान्तरवदिदं प्रत्येकमनेकमिह सदिति ॥ १९ ॥
तत्रैतदुदाहरणं यदुत्पादेन लक्ष्यमाणं सत् ॥
उत्पादेन परिणतं केवलमुत्पादमात्रमिह वस्तु ॥ २० ॥
यदि वा व्ययेन नियतं केवलमिह सदिति लक्ष्यमाणं स्यात्
व्ययपरिणतं च सदिति व्ययमात्रं किल कथं हि तत्र स्यात्

ध्रौव्येण परिणतं सद्यदि वा ध्रौव्येण लक्ष्यमाणं स्यात् ॥
उत्पादव्ययवदिदं स्यादिति तद्ध्रौव्यमात्रं सत् ॥ २२ ॥
सन्दृष्टिर्मृद्द्रव्यं सता घटेनेह लक्ष्यमाणं सत् ॥
केवलमिह घटमात्रमसता पिण्डेन पिण्डमात्रं स्यात् ॥२३॥
यदि वा तु लक्ष्यमाणं केवलमिह मृच्च मृत्तिकात्वेन ॥
एवं चैकस्य सतो व्युत्पादादित्रयश्च तत्रांशाः ॥ २४ ॥
न पुनः सतो हि सर्गः केनचिदंशैकभागमात्रेण ॥
संहारो वा ध्रौव्यं वृक्षे फलपुष्पपत्रवन्न स्यात् ॥ २५ ॥
ननु चोत्पादादित्रयमंशानामथ किमंशिनो वा स्यात् ॥
अपि किं सदंशमात्रं किमथांशमसदस्ति पृथगिति चेत् ॥
तन्न यतोऽनेकान्तो बलवानिह खलु न सर्वथैकान्तः ॥
सर्वं स्यादविरुद्धं तत्पूर्वं तद्विना विरुद्धं स्यात् ॥ २७ ॥
केवलमंशानामिह नाप्युत्पादो व्ययोऽपि न ध्रौव्यम् ॥
नाप्यंशिनस्त्रयं स्यात्किमुतांशेनांशिनो हि तत्त्रितयम् २८
ननु चोत्पादध्वंसौ स्यातामन्वर्थतोऽथ वाङ्मात्रात् ॥
दृष्टविरुद्धत्वादिह ध्रुवत्वमपि चैकस्य कथमिति चेत् २९
सत्यं भवति विरुद्धं क्षणभेदो यदि मतेत्रयाणां हि ॥
अथ वा स्वयं सदेव हि नश्यत्युत्पद्यते स्वयं सदिति ३०

दापि कुर्वद्रूपविशिष्टस्यापि कल्पनापि नैव स्यात् ॥
सहकारिसमवधानाभावादिह सोऽप्यवस्थानात् ॥ ११ ॥
ननु च स्थावरत्वे किन्न धर्मः क्षणिकलक्षणत्वात्स्यात् ॥
संहारः स्थावरत्वे स्यादिति संहारलक्षणत्वाद्वा ॥ १२ ॥
ध्रौव्यं चान्यावस्थत्वे भवति ध्रौव्यैकलक्षणात्तस्य ॥
एवं लक्षणभेदः स्याद्बीजांकुरपादपत्वविरति चेत् ॥१३॥
नैव यतः लक्षणभेदो न स्यादेकतमपदार्थे तत् ॥
उत्पादादित्रयमपि हेतोः सन्दृष्टितोऽपि निष्पन्नत्वात् १४
अथ तद्यथा हि बीजं बीजावस्थे सदैव नासदिति ॥
नच स्पर्धो न तत्त्वाञ्चयश्च तस्मात्तदंकुरावसरे ॥ १५ ॥
बीजावस्थायामपि न सदत्र्यंकुरमथोऽस्ति वा सदिति ॥
तस्मादुत्पादः स्यात्स्थावसरे चांकुरस्य नान्यथा ॥ १६ ॥
यदि वा बीजांकुरयोर्विशेषात्पादपत्वमिति वाच्यम् ॥
नष्टोऽन्यतो न तदिति नष्टोऽन्यतश्च पर्यायाभ्यां हि ॥ १७ ॥
आधारं न्यायपक्षादंतस्थाञ्जितपमेककाले स्यात् ॥
उत्पन्नमंकुरेण च नष्टं बीजेन पादपत्वं तत् ॥ १८ ॥
अपि चांकुरसृष्टेरिह य एव समयः स बीजनाशस्य ॥
उभयोरप्यात्मत्वात्स एव कालश्च पादपस्य ॥ १९ ॥

तस्मादनवद्यमिदं प्रकृतं तत्त्वस्य चैकसमये स्यात् ॥
उत्पादादित्रयमपि पर्यायार्थान्न सर्वथाऽपि सतः ॥ ४० ॥
भवति विरुद्धं हि तदा यदा सतः केवलस्य सविनयम्
पर्ययनिरपेक्षत्वात्लक्षणभेदोऽपि च तदैव सम्भवति ४१ ॥
यदि वा भवति विरुद्धं तदा यदाप्येकपर्ययस्य पुनः ॥
अस्त्युत्पादो यस्य व्ययोऽपि तस्यैव तस्य वै ध्रौव्यम् ४२
प्रकृतं सतो विनाशः केनचिदन्येन पर्ययेण पुनः ॥
केनचिदन्येन पुनः स्यादुत्पादो ध्रुवं तदन्येन ॥ ४३ ॥
सन्दृष्टिः पादपवत्स्वयमुत्पन्नः सदंकुरेण यथा ॥
नष्टो बीजेन पुनर्ध्रुवमित्युभयत्र पादपत्वेन ॥ ४४ ॥
न हि बीजेन विनष्टः स्यादुत्पन्नश्च तेन बीजेन ॥
ध्रौव्यं बीजेन पुनः स्यादित्यध्यक्षपक्षबाध्यत्वात् ॥ ४५
उत्पादव्ययोरपि भवति यदात्मा स्वयं सदेवेति ॥
तस्मादेतद्द्वयमपि वस्तु सदेवेति नान्यदस्ति सतः ॥ ४६
पर्यायादेशत्वादस्त्युत्पादो व्ययोऽस्ति च ध्रौव्यम् ॥
द्रव्यार्थादेशत्वान्नाप्युत्पादो व्ययोऽपि न ध्रौव्यम् ॥ ४७
ननु चोत्पादेन सता कृतमसतैकेन वा व्ययेनाथ ॥
यदि वा ध्रौव्येण पुनर्यद्वदयं तत्त्रयेण कथमिति चेत्

तत्र यदविनाभावः प्रादुर्भावध्रुवव्ययानां हि ॥
यस्मादेकेन विना न स्यादितरद्वयं तन्नियमात् ॥ ४९ ॥
अपि च द्वाभ्यां ताभ्यामन्यतमाभ्यां विना न चान्यतरत्
एकं वा तद्द्वयं तत्त्वमिह वस्तु संसिध्यै ॥ ५० ॥
अथ तद्यथा विनाशः प्रादुर्भावं विना न भावीति ॥
नियतमभावस्य पुनर्भावेन पुरस्सरत्वाच्च ॥ ५१ ॥
उत्पादोऽपि न भावी व्ययं विना वा तथा प्रतीतत्वात् ।
प्रत्यग्रजन्मनः किल भावस्याभावतः कृतार्थत्वात् ५२
उत्पादध्वंसौ वा द्वावपि न स्तो विनापि तद्ध्रौव्यम् ॥
भावस्याभावस्य च वस्तुत्वे सति तदाश्रयत्वाद्वा ॥ ५३
अपि च ध्रौव्यं न स्यादुत्पादव्ययद्वयं विना नियमात् ॥
यदिह विशेषाभावे सामान्यस्य सतोऽप्यभावत्वात् ॥ ५४
एवं चोत्पादादित्रयस्य साधीयसी व्यवस्थेह ॥
नैवान्यथाऽप्यनिह्नववदतः स्वस्यापि घातकत्वाच्च ॥५५॥
अथ तद्यथा हि सर्गं केवलमेकं हि मृगयमाणस्य ॥
असदुत्पादो वा स्यादुत्पादो वा न कारणाभावात् ५६
अप्यथ लोकयतः किल संहारं सर्गपक्षनिरपेक्षम् ॥
भवति निरन्वयनाशः सतो न नाशोऽथवाऽप्यहेतुत्वात्

अथ च ध्रौव्यं केवलमेकं किल पक्षमध्यक्षतश्च ॥
द्रव्यमपरिणामि स्यात्तदपरिणामाच्च नापि तद्ध्रौव्यम् ॥
अथ च ध्रौव्योपेक्षितमुत्पादादित्रयं प्रमाणयतः ॥
सर्वं क्षणिकमिवैतत्सदभावे वा व्ययो न सर्गश्च ॥ ५९ ॥
एतद्दोषभयादिह प्रकृतं चास्तिक्यमिच्छता पुंसा ॥
उत्पादादीनामयमविनाभावोऽवगन्तव्यः ॥ ६० ॥
उक्तं गुणपर्ययवद्द्रव्यं यत्तद्व्ययादियुक्तं सत् ॥
अथ वस्तुस्थितिरिह किल वाच्याऽनेकान्तबोधशुद्ध्यर्थम्
स्यादस्ति च नास्तीति च नित्यमनित्यं त्वनेकमेकं च ॥
तदतच्चेति चतुष्टययुग्मैरिव गुम्फितं वस्तु ॥ ६२ ॥
अथ तद्यथा यदस्ति हि तदेव नास्तीति तच्चतुष्कं च ॥
द्रव्येण क्षेत्रेण च कालेन तथाऽथ वाऽपि भावेन ॥६३॥
एका हि महासत्ता सत्ता वा स्यादवान्तराख्या च ॥
न पृथक्प्रदेशवत्त्वं स्वरूपभेदोऽपि नानयोरेव ॥ ६४ ॥
किन्तु सदित्यभिधानं यत्स्यात्सर्वार्थसार्थसंस्पर्शि ॥
सामान्यग्राहकत्वात्प्रोक्ता सन्मात्रतो महासत्ता ॥ ६५ ॥
अपि चावान्तरसत्ता सद्द्रव्यं सन्गुणश्च पर्यायः ॥
सच्चोत्पादध्वंसः सदिति ध्रौव्यं किलेति विस्तारः ॥६६॥

अथ यथा वस्तु यदा सदिति महासत्तयाऽवधार्येत ॥
स्यात्तदवान्तरसत्तारूपेणाभाव एव न तु मूलात् ॥६७॥
अपि चावान्तरसत्तारूपेण यदाऽवधार्यते वस्तु ॥
अपरेण महासत्तारूपेणाभाव एव भवति तदा ॥ ६८ ॥
दृष्टान्तः स्पष्टोऽयं यथा पटो द्रव्यमस्ति नास्तीति ॥
पटशुक्लत्वादीनामन्यतमस्याविवक्षितत्वाच्च ॥ ६९ ॥
क्षेत्रं द्विधाऽवधानात्सामान्यमथ च विशेषमात्रं स्यात् ॥
तत्र प्रदेशमात्रं प्रथमं प्रथमेतरं तदंशमयम् ॥ ७० ॥
अथ केवलं प्रदेशात्प्रदेशमात्रं यदेष्यते वस्तु ॥
अस्ति स्वक्षेत्रतया तदंशमात्राविवक्षितत्वाच्च ॥ ७१ ॥
अथ केवलं तदंशात्तावन्मात्राद्यदेष्यते वस्तु ॥
अस्त्यंशविवक्षितया नास्ति च देशाविवक्षितत्वाच्च ॥७२॥
संदृष्टिः पटदेशः क्षेत्रस्थानीय एव नास्त्यस्ति ॥
शुक्लादितन्तुमात्रादन्यतरस्याविवक्षितत्वाद्वा ॥ ७३ ॥
कालो वर्तनमिति वा परिणमनं वस्तुनः स्वभावेन ॥
सोऽपि पूर्ववद्द्वयमिह सामान्यविशेषरूपत्वात् ॥ ७४ ॥
सामान्यं विधिरूपं प्रतिषेधात्मा भवति विशेषश्च ॥
उभयोरन्यतरस्योन्मग्नत्वादस्ति नास्तीति ॥ ७५ ॥

तत्र निरंशो विधिरिति स यथा स्वयं सदेवेति ॥
तदिह विभज्य विभागैः प्रतिषेधश्चांशकल्पनं तस्य ॥ ७६
तदुदाहरणं सम्प्रति परिणमनं सत्तयाऽवधार्येत ॥
अस्ति विवक्षितत्वादिह नास्त्यंशाविवक्षया तदिह ॥७७॥
सन्दृष्टिः पटपरिणतिमात्रं कालायतस्वकालतया ॥
अस्ति च तावन्मात्रान्नास्ति पटस्तन्तुशुक्लरूपतया ॥७८॥
भावः परिणामः किल स चैव तत्त्वस्वरूपनिष्पत्तिः ॥
अथवा शक्तिसमूहो यदि वा सर्वस्वसारः स्यात् ॥७९॥
स विभक्तो द्विविधः स्यात्सामान्यात्मा विशेषरूपश्च ॥
तत्र विवक्ष्यो मुख्यः स्यात्स्वभावोऽथ गुणो हि परभावः
सामान्यं विधिरेव हि शुद्धः प्रतिषेधकश्च निरपेक्षः
प्रतिषेधो हि विशेषः प्रतिषेध्यः सांशकश्च सापेक्षः ८१
अयमर्थो वस्तुतया सत्सामान्यं निरंशकं यावत् ॥
भक्तं तदिह विकल्पैर्द्रव्याद्यैरुच्यते विशेषश्च ॥ ८२ ॥
तस्मादिदमनवद्यं सर्वं सामान्यतो यदाऽप्यस्ति ॥
द्रव्यविशेषविवक्षाभावादिह तदेव तन्नास्ति ॥ ८३ ॥
यदि वा सर्वमिदं यद्विवक्षितत्वाद्विशेषतोऽस्ति यदा ॥
अविवक्षितसामान्यात्तदैव तन्नास्ति नययोगात् ॥ ८४ ॥

तत्र विवक्ष्यो भावः केवलमस्ति स्वभावमात्रतया ॥
अविवक्षितपरभावाभावतया नास्ति सममेव ॥ ८५ ॥
सर्वत्र क्रम एष द्रव्ये क्षेत्रे तथाऽथ काले च ॥
अनुलोमप्रतिलोमैरस्तीति विवक्षितो मुख्यः ॥ ८६ ॥
अपि चैवं प्रक्रियया नेतव्याः पञ्च शेषभङ्गाश्च ॥
वर्णवदुक्तद्वयमिह पटवच्छेषास्तु तद्योगात् ॥ ८७ ॥
सन्दृष्टिः पटभावः पटसारो वा पटस्य निष्पत्तिः ॥
अस्त्यात्मना तदितरघटादिभावाविवक्षया नास्ति ॥८८॥
ननु चान्यतरेण कृतं किमथ प्रायः प्रयासभारेण ॥
अपि गौरवप्रसङ्गादनुपादेयाच्च वाग्विलासत्वात् ॥८९॥
अस्तीति च वक्तव्यं यदि वा नास्तीति तत्त्वसंसिद्ध्यै ॥
नोपादानं पृथगिह युक्तं तदनर्थकादिति चेत् ॥ ९० ॥
तन्न यतः सर्वं स्वं तदुभयभावाध्यवसितमेवेति ॥
अन्यतरस्य विलोपे तदितरभावस्य निह्नवापत्तेः ॥९१॥
स यथा केवलमन्वयमात्रं वस्तु प्रतीयमानोऽपि ॥
व्यतिरेकाभावे किल कथमन्वयसाधकश्च स्यात् ॥ ९२ ॥
ननु का नो हानिः स्यादस्तु व्यतिरेक एव तद्वदपि ॥
किन्त्वन्वयो यथाऽस्ति व्यतिरेकोऽप्यस्ति चिदचिदिव ॥

यदि वा स्यान्मतं ते व्यतिरेके नान्वयः कदाऽप्यस्ति ॥
न तथा पक्षच्युतिरिह व्यतिरेकोऽप्यन्वये यतो न स्यात्
तस्मादिदमनवद्यं केवलमयमन्वयो यथाऽस्ति तथा ॥
व्यतिरेकोऽस्त्यविशेषादेकोक्तया चैकशः समानतया ९९
दृष्टान्तोऽप्यस्ति घटो यथा तथा स्वस्वरूपतोऽस्ति पटः ॥
न घटः पटेऽथ न पटो घटेऽपि भवतोऽथ घटपटाविह हि
न पटाभावो हि घटो न पटाभावे घटस्य निष्पत्तिः ॥
न घटाभावो हि पटः पटसर्गो वा घटव्ययादिति चेत्
तत्किं व्यतिरेकस्याभावेन विनाऽन्वयो नास्तीति ॥
अस्त्यन्वयः स्वरूपादिति वक्तुं शक्यते यतस्त्विति चेत्
सन्न यतः सदिति स्याद्द्वैतं द्वैतभावभागपि च ॥
तत्र विधौ विधिमात्रं तदिह निषेधे निषेधमात्रं स्यात् ९९
न हि किञ्चिद्विधिरूपं किञ्चित्तच्छेपतो निषेधांशम् ॥
आस्तां साधनमस्मिन्नाम द्वैतं न निर्विशेषत्वात् ॥१००॥
न पुनर्द्रव्यान्तरवत्सञ्ज्ञाभेदोऽप्यबाधितो भवति ॥
तत्र विधौ विधिमात्राच्छेषविशेषादिलक्षणाभावात् ॥१॥
अपि च निषिद्धत्वे सति न हि वस्तुत्वं विधेरभावत्वात्
उभयात्मकं यदि खलु प्रकृतं न कथं प्रतीयेत ॥ २ ॥

तस्माद्विधिरूपं वा निर्दिष्टं सन्निषेधरूपं वा ॥
संहृत्याऽन्यतरत्वादन्यतरे सन्निरूप्यते तदिह ॥ ३ ॥
दृष्टान्तोऽत्र पटत्वे यावन्निर्दिष्टमेव तन्तुतया ॥
तावच्च पटो नियमाद्दृश्यत्वे तन्तवस्तथाऽप्यपक्षात् ॥ ४ ॥
यदि पुनरेव पटत्वे तदिह तथा दृश्यते न तन्तुतया ॥
अपि संगृह्य समन्तात्पटोऽयमिति दृश्यते सद्भिः ॥ ६ ॥
इत्यादिकाश्च बहवो विद्यन्ते पाक्षिका हि दृष्टान्ताः ॥
तेषामुभयात्मकत्वान्न हि कोऽपि विपक्षः स्यात् ॥ ७ ॥
अयमर्थो विधिरेव हि युक्तिवशात्स्यात्स्वयं निषेधात्मा ॥
अपि च निषेधस्तद्वद्विधिरूपः स्यात्स्वयं हि युक्तिवशात्॥
इति विन्दन्निह तत्त्वं जैनः स्यात्कोऽपि तत्त्ववेदीति ॥
अर्थात्स्याद्वादी तदपरथा नाम सिंहमाणवकः ॥८॥
ननु सदिति स्थायि यथा सदिति तथा सर्वकालसमयेषु
तत्र विवक्षितसमये तत्स्यादथवा न तदिदमिति चेत् ९
सत्यं तत्रोत्तरमिति सन्मात्रापेक्षया तदेवेदम् ॥
न तदेवेदं नियमात्तदवस्थापेक्षया पुनः सदिति ॥ १०
ननु तदतदोर्द्वयोरिह नित्यानित्यत्वयोरिव ॥
को भेदो भवति मिथो लक्षणलक्ष्यैकभेदभिन्नत्वात् ११

नैवं यतो विशेषः समयात्परिणमति वा न नित्यादौ ॥
सदसद्भावविचारे परिणामो विसदृशोऽथ सदृशो वा १२
ननु सन्नित्यमनित्यं कथञ्चिदेतावतैव तत्सिद्धिः ॥
तत्किं तद्तद्भावाभावविचारेण गौरवादिति चेत् ॥१३॥
नैवं तद्तद्भावाभावविचारस्य निह्नवे दोषात् ॥
नित्यानित्यात्मनि सति सत्यपि न स्यात्क्रियाफलं तत्त्वम्
अयमर्थो यदि नित्यं सर्वं सत् सर्वथेति किल पक्षः ॥
न तथा कारणकार्यकारकसिद्धिस्तु विक्रियाभावात् १५
यदि वा सदनित्यं स्यात्सर्वस्वं सर्वथेति किल पक्षः ॥
न तथा क्षणिकत्वादिह क्रियाफलं कारकाणि तत्त्वं च ॥
अपि नित्यानित्यात्मनि सत्यपि सति वा न साध्यसंसिद्धिः
तद्तद्भावाभावैर्विना न यस्माद्विशेषनिष्पत्तिः ॥ १७ ॥
अथ तद्यथा यथा सत्परिणममानं यदुक्तमस्तु तथा ॥
भवति समीहितसिद्धिर्विना न तद्तदिति तथा हि यथा १८
यदि परिणममानं सत्तदिदं नन्वसर्वथाऽन्यदेवेति ॥
इति पूर्वपक्षः किल विना तदेवेति दुर्निवारः स्यात् १९
अपि परिणतं यथा सद्दीपशिखा सर्वथा तदेव यथा ॥
इति पूर्वपक्षः किल दुर्वारः स्याद्विना न तदिति नयात् ॥

तस्मादवसेयं सन्नित्यानित्यत्ववद्यदतद्वत् ॥
यस्मादेकेन विना न समीहितसिद्धिरध्यक्षात् ॥ २१ ॥
ननु भवतु सर्वथैव हि परिणामो विसदृशोऽथ सदृशो वा
ईहितसिद्धिस्तु सतः परिणामित्वाद्यथाकथंचिद्वै ॥ २२ ॥
तन्न यतः परिणामः सन्नपि सदृशैकपक्षतो न तथा ॥
न समर्थश्चार्थकृते नित्यैकान्तादिपक्षवत्सदृशात् ॥ २३ ॥
नापीष्टसंसिद्ध्यै परिणामो विसदृशैकपक्षात्मा ॥
क्षणिकैकान्तवदसतः प्रादुर्भावात्सतो विनाशाद्वा ॥२४॥
एतेन निरस्तोऽभूत्क्लीबत्वादात्मनोऽपराद्धतया ॥
तदतद्भावाभावापह्नववादी विबोध्यते त्वधुना ॥ २५ ॥
तदतद्भावनिबद्धो यः परिणामः सतः स्वभावतया ॥
तद्दर्शनमधुना किल दृष्टान्तपुरस्सरं वक्ष्ये ॥ २६ ॥
जीवस्य यथा ज्ञानं परिणामः परिणमंस्तदेवेति ॥
सदृशस्योदाहृतिरिति जातेरनतिक्रमत्वतो वाच्या ॥२७॥
यदि वा तदिह ज्ञानं परिणामः परिणमन्न तदिति यतः
स्वावसरे यत्सत्त्वं तदसत्त्वं परत्र नययोगात् ॥ २८ ॥
अत्रापि च संदृष्टिः सन्ति च परिणामतोऽपि कालांशाः
जातेरनतिक्रमतः सदृशत्वनिबन्धना एव ॥ २९ ॥

अपि नययोगाद्विसदृशसाधनसिध्यै त एव कालांशाः ॥
समयसमय(?) सोऽप्यौति बहुप्रतीतित्वात् ॥ १० ॥
अतदिदमिह प्रतीतौ क्रिया फलं कारकाणि हेतुरिति ॥
तदिदं स्यादिह संविदि ॥ हेतुस्तत्त्वं हि चेन्मिथः प्रेम ॥
अयमर्थः सदसद्वत्तद्वदपि च विधिनिषेधरूपं स्यात् ॥
न पुनर्निरपेक्षतया तद्द्वयमपि तत्त्वमुभयतया ॥ १२ ॥
रूपनिदर्शनमेतत्तदिति यदा केवलं विधिर्मुख्यः ॥
अतदिति गुणो पृथक्त्वात्तन्मात्रं निरवशेषतया ॥ १३ ॥
अतदिति विधिर्विवक्ष्यो मुख्यः स्यात्केवलं यदा देशात् ॥
तदिति स्वतो गुणत्वादविवक्षितमित्यतन्मात्रम् ॥ १४ ॥
शेषविशेषाख्यानं ज्ञातव्यं चोक्तवक्ष्यमाणतया ॥
सूत्रे पदानुवृत्तिर्ग्राह्या सूत्रान्तरादिति न्यायात् ॥ १५ ॥
ननु किं नित्यमनित्यं किमथोभयमनुभयं च तत्त्वं स्यात् ॥
व्यस्तं किमथ समस्तं क्रमतः किमथाक्रमादेतत् ॥ १६ ॥
सत्यं स्वपरनिहत्यै सर्वं किल सर्वथेति पदपूर्वम् ॥
स्वपरोपकृतिनिमित्तं सर्वं स्यात्स्यात्पदाङ्कितं तु पदम् ॥
अथ तद्यथा यथा सत्स्वतोऽस्ति सिद्धं तथा च परिणामि
इति नित्यमथानित्यं सच्चैकद्विस्वभावतया ॥ १८ ॥

अयमर्थो वस्तु यदा केवलमिह दृश्यते न परिणामः ॥
नित्यं तदव्ययादिह सर्वं स्यादन्वयार्थनययोगात् ॥ ३९ ॥
अपि च यदा परिणामः केवलमिह दृश्यते न किल वस्तु
अभिनवभावानभिनवभावाभावादनित्यमंशनयात् ॥४०॥
ननु चैकं सदिति यथा तथा च परिणाम एव तद्द्वैतम् ॥
वस्तु(नु) समयमन्यतरं कथं हि समं न सदिति कुतः ४१
अथ किं खलादिवर्णाः सन्ति यथा युगपदेव तुल्यतया ॥
वस्पन्ते क्रमतस्ते क्रमवर्तित्वाद्ध्वनेरिति न्यायात् ॥४२॥
अथ किं खरतरदृष्ट्या विन्ध्यहिमाचलयुगं यथास्ति तथा ॥
भवतु विवक्ष्यो मुख्यो विवक्षुरिच्छावशाद्गुणोऽन्यतरः
अथ चैकः कोऽपि यथा सिंहः साधुर्विवक्षितो द्वेधा ॥
सत्परिणामोऽपि तथा भवति विशेषणविशेष्यवदिति किमिति
अथ किमनेकार्थत्वादेकं नामद्वयाङ्कितं किञ्चित् ॥
अग्निर्वैश्वानर इव सव्येतरगोविषाणवत्किमथ ॥ ४५ ॥
अथ किं कालविशेषादेकः पूर्वं ततोऽपरः पश्चात् ॥
आमानामविशिष्टं पृथिवीत्वं तयथा तथा किमिति ॥ ४६ ॥
अथ किं कालक्रमतोऽप्युत्पन्नं वर्तमानमिव चास्ति ॥
भवति सपत्नीद्वयमिह यथा मिथः प्रत्यनीकतया ॥ ४७ ॥

अथ किं ज्येष्ठकनिष्ठभ्रातृद्वयमिव मिथः सपक्षतया ॥
किमथोपसुन्दसुन्दमल्लन्यायात्किलेतरेतरस्मात् ॥ ४८ ॥
केवलमुपचारादिह भवति परत्वापरत्ववत्किमथ ॥
पूर्वापरदिग्द्वैतं यथा तथा द्वैतमिदमुपेक्षतया ॥ ४९ ॥
किमथाधाराधेयन्यायादिह कारकादिद्वैतमिव ॥
स यथा घटे जलं स्यान्न स्यादिह जले घटः कश्चित् ५०
अथ किं बीजांकुरवत्कारणकार्यद्वयं यथाऽस्ति तथा ॥
स यथा योनीभूतं तत्रैकं योनिजं तदन्यतरम् ॥ ५१ ॥
अथ किं कनकोपलवत्किञ्चित्स्वं किञ्चिदस्वमेव यतः ॥
ग्राह्यं स्वं सारतया तदितरमस्वं तु हेयमसारतया ॥५२॥
अथ किं वागर्थद्वयमिव सम्पृक्तं सदर्थसंसिद्ध्यै ॥
पानकवत्किमथावश्यमुपयोगि मिथः सापेक्षकं द्वैतात् ॥ ५३ ॥
अथ किमवश्यतया तद्वक्तव्यं स्यादनन्यथासिद्धेः ॥
भेरीदण्डवदुभयोः संयोगादिव विवक्षितः सिध्येत् ॥५४॥
अथ किमुदासीनतया वक्तव्यं वा यथारुचित्वान्न ॥
यदपूर्णन्यायादप्यन्यतरेणेह साध्यसंसिद्धेः ॥ ५५ ॥
अथ किमुपादानतया स्वार्थं सृजति कश्चिदन्यतमः ॥
अपरः सहकारितया प्रकृतं पुष्णाति मित्रवत्तदिति ॥५६॥

धातुवदादेशः स्यात्तद्वत्तद्वतमेव किमिति यथा ॥
एकं विनाश्य मूलादन्यतमः स्वयमुदेति निरपेक्षः ॥५७॥
अथ किं वैमुख्यतया विसन्धिरूपं द्वयं तदर्थकृते ॥
वामेतरकरवर्तिनरज्जूयुग्मं यथा स्वमिदमिति चेत् ॥५८॥
नैवमदृष्टान्तत्वात्स्वेतरपक्षोभयस्य घातित्वात् ॥
नाचरते मन्दोऽपि च स्वस्य विनाशाय कश्चिदेव यतः ५९
तत्र मिथस्सापेक्षधर्मद्वयदेशितप्रमाणस्य ॥
माभूदभाव इति न हि दृष्टान्तो वर्ण्यते किलेत्यत्र ॥६०॥
अपि च प्रमाणाभावे न हि नयपक्षः क्षमः स्वरक्षायै ॥
वाक्यविवक्षाभावे पदपक्षः कारकोऽपि नार्थकृते ॥ ६१ ॥
संस्कारस्य वशादिह पदेषु वाक्यप्रतीतिरिति चेद्वै ॥
वाच्यं प्रमाणमात्रं न नयादुक्तस्य दुर्निवारत्वात् ॥६२॥
अथ चैवं सति नियमाद्दुर्वारं दूषणद्वयं भवति ॥
नयपक्षच्युतिरिति वा क्रमवर्तित्वाद्ध्वनेरहेतुत्वम् ॥ ६३ ॥
विन्ध्यहिमाचलयुग्मं दृष्टान्तो नेष्टसाधनायालम् ॥
तदनेकत्वे नियमादिच्छानर्थक्यतोऽविशेषश्च ॥ ६४ ॥
नालमसौ दृष्टान्तः सिंहः साधुर्यथेह कोऽपि नरः ॥
दोषादपि स्वरूपासिद्धत्वादिह यथा जलं सुरभि ॥६५॥

नासिद्धं हि स्वरूपासिद्धत्वं तस्य साध्यशून्यत्वात् ॥
केवलमिह रूढिवशादुपेक्ष्य धर्मद्वयं यथेच्छत्वात् ॥ ६७ ॥
अग्निर्वैश्वानर इव नामद्वैतं च नेष्टसिद्ध्यर्थम् ॥
साध्यविरुद्धत्वादिह सन्दृष्टेरथ च साध्यशून्यत्वात् ॥
नामद्वयं किमर्थादुपेक्ष्य धर्मद्वयं च किमपेक्ष्य ॥
प्रथमे धर्माभावेऽप्यलं विचारेण धर्मिणो भावात् ॥ ६८॥
प्रथमेतरपक्षेऽपि च भिन्नमभिन्नं किमन्वयात्तदिति ॥
भिन्नं चेदविशेषादुक्तवदसतो हि किं विचारतया ॥६९॥
अथ चेद्युतसिद्धत्वात्तन्निष्पत्तिर्द्वयोः पृथक्त्वेऽपि ॥
सर्वस्य सर्वयोगात्सर्वः सर्वोऽपि दुर्निवारः स्यात् ॥७०॥
चेदन्वयादभिन्नं धर्मद्वैतं किलेति नयपक्षः ॥
रूपपटादिवदिति किं किमथ सारद्रुमवदथेति ॥ ७१ ॥
सारद्रुमवदिदं चेदनुपादेयं मिथोऽनपेक्षत्वात् ॥
वर्णान्तरविशेषन्यायान्न नयान्नमाणं वा ॥ ७२ ॥
रूपपटादिवदिति चेत्सत्यं प्रकृतस्य सानुकूलत्वात् ॥
एकं नामद्वयाङ्कमिति पक्षस्य स्वयं विपक्षत्वात् ॥ ७३ ॥
अपि चाकिञ्चित्कर इव सव्येतरगोविषाणदृष्टान्तः ॥
सुरभि गगनारविन्दमिवाश्रयासिद्धदृष्टान्तात् ॥ ७४ ॥

न यतः पृथगिति किञ्चित्सत्परिणामातिरिक्तमिह वस्तु ॥
दीपप्रकाशयोरिह गुम्फितमिव तद्द्वयोरैक्यात् ॥ ७५ ॥
आत्मा नामविशिष्टं पृथिवीत्वं नेह भवति दृष्टान्तः ॥
क्रमवर्तित्वादुभयोः स्वेतरपक्षद्वयस्य घातित्वात् ॥ ७६ ॥
परपक्षस्तावत्क्रमवर्तित्वाच्च स्वतः सनिश्चयतः ॥
असमर्थसाधनत्वात्स्वयमपि वा बाधकः स्वपक्षस्य ॥७७॥
तत्साध्यमनित्यं वा यदि वा नित्यं निसर्गतो वस्तु ॥
स्यादिह पृथिवीत्ववता नित्यमनित्यं सपरूपकतया ॥७८॥
अपि च सपत्नीयुग्मं स्यादिति हास्यास्पदोपमा दृष्टिः ॥
इह यदसिद्धविरुद्धानैकान्तिकदोषदुष्टत्वात् ॥ ७९ ॥
माता मे वन्ध्या स्यादित्यादिवदपि विरुद्धवाक्यत्वात् ॥
कृतकत्वादिति हेतोः क्षणिकैकान्तात्तत्त्वे विचारतया ८०
सद्व्यपेक्षकनिपुणार्हद्वदनं विरुद्धदृष्टान्तः ॥
सति च धर्मिणि तत्त्वे तथाऽऽश्रयासिद्धदोषत्वात् ८१
अपि कोऽपि परायत्तः सोऽपि परः सर्वथापरायत्तात् ॥
सोऽपि परायत्तः स्यादित्यनवस्थाप्रसङ्गदोषश्च ॥ ८२ ॥
नार्थक्रियासमर्थो दृष्टान्तः कारकादिवद्धि पनः ॥
सव्यभिचारित्वादिह सपक्षवृत्तेर्विपक्षवृत्तिश्च ॥८३ ॥

वृक्षे शाखा हि यथा स्यादेकात्मनि तथैव नानात्वे ॥
स्थाल्यां दधीनि हेतोर्व्यभिचारी कारकः कथं न स्यात् ॥
अपि सव्यभिचारित्वे यथाकथंचित्सपक्षदक्षश्चेत् ॥
नयतः परपक्षरिपुर्यथा तथाऽरिः स्वयं स्वपक्षस्य ॥८५॥
साध्यं देशांशाद्वा सत्परिणामद्वयस्य सांशत्वम् ॥
तत्साम्येकविलोपे कस्यांशा अंशमात्र एवांशः ॥ ८६ ॥
नाप्युपयोगी क्वचिदपि बीजांकुरवादिहेति दृष्टान्तः ॥
स्वावसरे स्वावसरे पूर्वापरभावभावित्वात् ॥ ८७ ॥
बीजावसरे नांकुर इव बीजं नांकुरक्षणे हि यथा ॥
न तथा सत्परिणामद्वैतस्य तदेककालत्वात् ॥ ८८ ॥
सद्भावे परिणामो भवति न सत्ताक आश्रयाभावात् ॥
दीपाभावे हि यथा तत्क्षणमिव दृश्यते प्रकाशो न ॥८९॥
परिणामाभावेऽपि च सदिति च नालम्ब्यते हि सत्वान्तात्
स यथा प्रकाशनाशे प्रदीपनाशोऽप्यवश्यमध्यक्षात् ॥९०॥
अपि च क्षणभेदः किल भवतु यदीष्टासिद्धिरनायासात्
साऽपि न यतस्तथा सति सतो विनाशोऽसतश्च सर्गः स्यात् ॥
कनकोपलवद्द्वैतः क्षमते न परीक्षितः क्षणं स्थातुम् ॥
गुणगुणिभावाभावाद्यतः स्वयमसिद्धदोषात्मा ॥ ९२ ॥

कार्यम्प्रति निमित्तत्वाद्धेतुद्वैतं न ततोऽतिरिक्तं चेत् ॥
तन्न यतस्तन्नियमग्राहकमिव न प्रमाणमिह ॥ २ ॥
एवं मिथः सपक्षद्वैतवदित्यपि न साधुदृष्टान्तः ॥
अनवस्थादोषत्वाद्यथाऽरिरस्यापरारिरपि यस्मात् ॥ ३ ॥
कार्यमपि नियतत्वाच्छन्नुद्वैते न ततोऽतिरिक्तं चेत् ॥
तन्न यतस्तन्नियमग्राहकमिव न प्रमाणमिह ॥ ४ ॥
वामेतरकरवर्तितरज्जुयुग्मं न चेह दृष्टान्तः ॥
बाधितविषयत्वाद्वा दोषात्कालात्ययापदिष्टत्वात् ॥ ५ ॥
तद्भावप्रमुपादाने कारणसदृशं हि कार्यमेकत्वात् ॥
अरस्त्वनतिगोरसत्वं दधिदुग्धावस्थयोर्यथाऽप्यज्ञात् ॥६॥
सुन्दोपसुन्दमल्लद्वैतं दृष्टान्ततो प्रतिज्ञातम् ॥.
सदसदसत्त्वापेक्षितोऽत्रानियतदोषत्वात् ॥ ७ ॥
सत्युपसुन्दे सुन्दो भवति च सुन्दे किलोपसुन्दोऽपि ॥
एकस्यापि न सिद्धिः क्रियाफलं वा तदाऽऽत्मघुलदोषात्
अथ चंदनादिसिद्धं कृतफलापहवापदेवेह ॥
तदपि न तद्वैते किन्त्वनकं दोषात्पदं यदभैतत् ॥ ९ ॥
दृष्टान्ताभासा इति निक्षिप्ताः स्वेष्टसाध्यशून्यत्वात् ॥
अस्योन्मुरेवत् इव दृष्टान्तास्तत्र यथा प्रकृतपक्षे ॥१०॥

सत्परिणामाद्वैतं स्यादविभिन्नप्रदेशवत्त्वाद्धि ॥
सत्परिणामद्वैतं स्यादपि दीपप्रकाशयोरेव ॥ ११ ॥
अथवा जलकल्लोलवदद्वैतं द्वैतमपि च तद्द्वैतम् ॥
उन्मज्जच्च निमज्जदप्युन्मज्जन्निमज्जदेवेति ॥ १२ ॥
घटमृत्तिकयोरिव वा द्वैतं तद्द्वैतवदद्वैतम् ॥
नित्यं मृण्मात्रतया यदनित्यं घटत्वमात्रतया ॥ १३ ॥
अयमर्थः सन्नित्यं तदभिज्ञैर्यथा तदेवेदम् ॥
न तदेवेदं नियमादिति प्रतीतेश्च सदनित्यं स्यात् ॥१४॥
अप्युभययुक्तिवशादेकं सदेककालमेकोक्तेः ॥
अप्यनुभयं सदेतन्नयप्रमाणादिवादशून्यत्वात् ॥ १५ ॥
व्यस्तं सन्नययोगादस्ति नित्यत्वमथ तत्तस्य ॥
अपि च समस्तं सदिति प्रमाणसापेक्षतो विवक्षायाः १६
न विरुद्धं क्रमवर्ति च सदिति तथोऽनादितोऽपि परिणामि
अक्रमवर्ति सदित्यपि न विरुद्धं सदैकरूपत्वात् ॥ १७ ॥
ननु किमिदं जगदशरणं विरुद्धधर्मद्वयाधिरोपत्वात् ॥
स्वयमपि संशयदोलान्दोलित इव चलितप्रतीतिः स्यात्
इह कश्चिज्जिज्ञासुर्नित्यं सदिति प्रतीयमानोऽपि ॥
सदनित्यमिति विपक्षे सति शल्ये स्यात्कथं हि निश्चयः

इच्छन्नपि सदनित्यं भवति न निश्चितमना जनः कश्चित्
जीवद्रव्यस्यत्वादिह सन्नित्यं तद्विरोधिनोऽध्यक्षात् ॥२०॥
तत एव दुरधिगम्यो न श्रेयः श्रेयसे ह्यनेकान्तः ॥
अप्यात्मसुखदोषात्सव्यभिचारो यतोऽचिरादिति चेत् २१
तन्न यतस्तदभावे बलवानस्तीह सर्वथैकान्तः ॥
सोऽपि च सदनित्यं वा सन्नित्यं वा न साधनायालम् ॥
सन्नित्यं सर्वस्मादिति पक्षे विक्रिया कुतो न्यायात् ॥
तदभावेऽपि न तत्त्वं क्रियाफलं कारकाणि यावदिति
परिणामः सद्वस्त्वाकर्मत्वात्क्रियेति निर्देशः ॥
तदभावे सदभावो नासिद्धः सुप्रसिद्धदृष्टान्तात् ॥ २४ ॥
अथ तद्यथा पटस्य क्रिया प्रसिद्धेति तन्तुसंयोगः ॥
भवति पटाभावः किल तदभावे यथा तदनन्यात् ॥२५॥
अपि साधनं क्रिया स्यादपवर्गस्तत्फलं प्रमाणत्वात् ॥
तत्कर्ता नाकारकमेतत्सर्वं न विक्रियाभावात् ॥ २६ ॥
ननु का नो हानिः स्यादस्तु तथा कारकाद्यभावश्च ॥
अर्थात्सन्नित्यं किल न बोधपथातुरे तदनुवर्ति ॥ २७ ॥
सत्यं सर्वमनीप्सितमेतत्तदभाववादिना यावत् ॥
परसमयतत्क्षणिकादिति यावन्मोदेति मन्दृष्टान्तः ॥ २८ ॥

असदुत्पादेऽपि पुनः स्यात्सदनित्यं सर्वतोऽपि किल यतः ॥
नाशेव सतो नाशादपि प्रमाणं च तत्फलं परमात् ॥१०॥
अपि परतःसिद्धमिति पक्षो भवति च निग्रहत्वे स्वतत्त्वस्य ॥
युतसिद्धत्वादिति पुनः स्यादिद्धं नष्टत्वादिनामिह हि ॥
अपि च तदद्वयवसानः कर्तापि च सद्भावसाधनायालम् ॥
कल्पापूर्व हि स्वधर्मीत्वप्रसाधनाद्विधर्मीयत्वात् ॥ ११ ॥
अपि वस्तुत्वमिदं सत्साधनमिह यथा तदेवेदम् ॥
सद्भिज्ञानतयसाधकसाणिर्विकल्पस्य बाधकं च स्यात् ॥१२॥
क्षणिकैकान्तपदिदृशोऽपि नित्यैकान्ते न सम्यसिद्धिः स्यात् ॥
तस्मान्न्यायागतमिति नित्यानित्यात्मकं स्वतस्तत्त्वम् १३
ननु चैकं सदिति स्यात्किमनेकं स्यादथोभयं चैतत् ॥
अनुभयमिति किं तत्त्वं रूपं पूर्ववदेवान्यथा किमिति १४
सत्यं सदेकमिति वा सदनेकं चोभयं च नययोगात् ॥
न च सर्वथा सदेकं सदनेकं वा सदप्रमाणत्वात् ॥ १५ ॥
अथ तद्यथा सदेकं स्यादविभिन्नप्रदेशवत्त्वाद्वा ॥
गुणपर्यायांशैरपि निरंशदेशादखण्डसामान्यात् ॥ १६ ॥
द्रव्येण क्षेत्रेण च कालेनापीह चापि भावेन ॥
सदखण्डं नियमादिति यथाऽधुना वक्ष्यते हि तल्लक्ष्म १७



यदि वा सा वदतस्य स्यादिति पक्षोऽसमीक्ष्यकारित्वात्
व्यतिरेकाभावः किल भवति तदास्पदस्य सतोऽप्यपक्षपातत्वात्
एतेन निरस्तोऽभूज्ज्ञानासत्त्वैकसत्त्ववादीति ॥
प्रत्येकमनेकमपि सद्द्रव्यं सन्गुणो यथेत्यादि ॥ ४८ ॥
क्षेत्रं प्रदेश इति वा सदधिष्ठानं च भूर्निवासश्च ॥
तदपि स्वयं सदेव स्यादपि यावन्न सत्प्रदेशस्थम् ॥४९॥
अथ ते त्रिधा प्रदेशाः क्वचिन्निरंशैकदेशमात्रांशात् ॥
क्वचिदपि च पुनरसंख्यप्रदेशमयं पुनरनन्तदेशवपुः ॥५०॥
ननु च द्व्यणुकादि यथा स्यादपि संख्यातदेशि सच्चिन्ति चेत्
न यतः शुद्धादेशैरुपचारस्याविवक्षितत्वाद्वा ॥ ५१ ॥
अयमर्थः सदृष्टा यथैकदेशीत्यनेकदेशीति ॥
एकमनेकं च स्यात्प्रत्येकं तन्न सद्द्वयान्वयात् ॥ ५२ ॥
अथ यस्य यदा यावद्यनेकदेशे यथास्थितं सदिति ॥
तद्यावत्तस्य तदा तथा समुदितं च सर्वदेशेषु ॥ ५३ ॥
इत्यनवद्यमिदं स्याल्लक्षणमुद्देशि तस्य तत्र यथा ॥
क्षेत्रेणाखण्डितत्वात्सदेकमित्यत्र नयविभागोऽयम् ॥५४॥
न पुनश्चैकापवरकसञ्चारितानेकदीपवत्सदिति ॥
हि यथा दीपसमूहो प्रकाशवृद्धिस्तथा न ॥

अपि तत्र दीपशमने कस्मिंश्चित्सत्प्रकाशहानिः स्यात् ॥
न तथा स्यादविवक्षितदेशे तद्धानिरेकरूपत्वात् ॥ ५६ ॥
नात्र प्रयोजकं स्यान्नियतनिजाभोगदेशमात्रत्वम् ॥
तदनन्यथात्वसिद्धौ सदनेकं सेत्स्यतः कथं स्यादा ॥५७॥
सदनेकं देशानामुपसंहारात्प्रसर्पणादिति चेत् ॥
न यतो नित्यविभूनां व्योमादीनां न तदिह तद्योगात् ॥
अपि परमाणोरिह वा कालाणोरेकदेशमात्रत्वात् ॥
कथमिव सदनेकं स्यादुपसंहारप्रसर्पणाभावात् ॥ ५९ ॥
ननु च सदेकं देशैरिव संख्यां खण्डयितुमशक्यत्वात् ॥
नभावि सदनेकं देशैरिव संख्यानेकतो नयादिति चेत् ॥
न यतोऽव्ययविवेचनमेकक्षेत्रावगाहिनां चास्ति ॥
न पृथक्त्वमनेकत्वं न हि तेषां तथाऽपि तद्योगात् ॥६१॥
ननु वै यथा प्रदेशाः सन्ति मिथो गुम्फितैकसूत्रत्वात् ॥
न तथा सदेकत्वादेकक्षेत्रावगाहिनः सन्ति ॥ ६२ ॥
न सत्यं तत्र निदानं किमिति तदन्वेषणीयमेव स्यात् ॥
प्रतीतावखण्डितमिव सत्त्वादेकमनेकदेशवत्त्वेऽपि ॥ ६३ ॥
अननु तत्र निदानमिदं परिणममाने यदेकदेशेऽस्य ॥
देशेरिव पर्वसु किल परिणमनं सर्वदेशेषु ॥ ६४ ॥

तन्न यतस्तद्ग्राहकमिव प्रमाणं च नास्त्यदृष्टान्तात् ॥
केवलमन्वयमात्रादपि वा व्यतिरेकिणश्च तदसिद्धेः ॥६८॥
ननु चैकस्मिन्देशे कस्मिंश्चिदन्यतरेऽपि हेतुवशात् ॥
परिणमति परिणमन्ति हि देशाः सर्वे सदेकतोऽस्त्विति चेत्
न यतः सव्यभिचारः पक्षेऽनैकान्तिकत्वदोषत्वात् ॥
परिणमति समयदेशे तद्देशाः परिणमन्ति चेति यथा ॥
व्यतिरेके वाक्यमिदं यदपरिणमति सदेकदेशे हि ॥
क्वचिदपि न परिणमन्ति हि तद्देशाः सर्वतः सदेकत्वात् ॥
तन्न यतः सति सति वै व्यतिरेकाभाव एव भवति यथा
सद्देशसमयभावैरखण्डितत्वात्स्वतः स्वतः सिद्धात् ॥ ६९ ॥
एवं पक्षेऽपि दूरादपि (?) नेतव्या हि लक्षणाभासाः ॥
यदि किञ्चित्कारित्वादनधिकारिणोऽनुक्ताः ॥ ४७० ॥
कालः समयो यदि वा तद्देशो वर्तना कृतिश्चार्थात् ॥
तेनाप्यखण्डितत्वाद्भवति सदेकं तदेकनययोगात् ॥ ७१॥
अयमर्थः सन्मात्रमिह संस्थाप्य प्रवाहरूपेण ॥
क्रमतो व्यस्तसमस्तैरितस्ततो वा विचारयन्तु बुधाः ॥
तत्रैकावसरस्थं यथावदादृगस्ति सत्सर्वम् ॥
सर्वावसरसमुदितं यथावदादृगस्ति सत्सर्वम् ॥ ७२ ॥

न पुनः काञ्चनमुद्रा यथा शरीरादिवृद्धिरिति वृद्धा ॥
अपि तद्धानौ हानिर्न तथा वृद्धिर्न हानिरेव सतः ॥ ७४
ननु भवति पूर्वपूर्वभावध्वंसात्तु वृद्धिरेव सतः ॥
स्यादपि तदुत्तरोत्तरभावोत्पादेन हानिरेव सतः ॥ ७५ ॥
नैवं यतो विनाशादसतः सर्गादसिद्धसिद्धान्तात् ॥
सदनन्यथाऽथ वा चेत्सदनित्यं कालतः कथं तस्य ॥ ७६
नाभिज्ञमनित्यत्वं ममत्वतः स्वात्मनोऽप्यनित्यस्य ॥
परिणामित्वान्नियतं सिद्धं तज्जलप्रवाहदृष्टान्तात् ॥ ७७ ॥
तस्मादनवद्यमिदं परिणममानं पुनः पुनः सदपि ॥
स्यादेकं कालादपि निजनयपक्षादप्यभिन्नत्वाद्वा ॥ ७८ ॥
भावः परिणाममयः शक्तिविशेषोऽथवा स्वभावः स्यात्
प्रकृतिः स्वरूपमात्रं लक्षणमिह गुणश्च धर्मश्च ॥ ७९ ॥
तेनाप्यखण्डतया स्यादेकं सदेकदेशनययोगात् ॥
तल्लक्षणमिदमधुना विधीयते सावधानतया ॥ ८० ॥
सर्वं सदिति यथा स्यादिह संस्थाप्य गुणपङ्क्तिरूपेण ॥
पश्यन्तु भावमात्रं निःशेषं सदशेषमिह किञ्चित् ॥
एकं तत्रान्यतरं भाव समीक्ष्य भावमिह सदिति ॥
सर्वानपि भावानिह व्यस्तसमस्तानवेक्षणाभावात् ॥ ८१ ॥

न पुनर्द्व्यणुकादिरिति स्कन्धः पुद्गलमयोऽस्त्यणूनां हि ॥
लघुरपि भवति लघुत्वे सति च महत्त्वे महानिहास्ति यथा
अयमर्थो वस्तु यदा स्तेन विवक्षितैकभावेन ॥
तन्मात्रं सदिति स्यात्तन्मात्रः स च विवक्षितो भावः ॥
यदि पुनरन्यतरेण हि भावेन विवक्षितं तदेव स्यात् ॥
तन्मात्रं सदिति स्यात्तन्मात्रः स च विवक्षितो भावः ॥
अत्रापि च सन्दृष्टिः कनकः पीतादिमानिहास्ति यथा ॥
पीतेन पीतमात्रो भवति गुरुत्वादिना च तन्मात्रः ॥८६॥
न च किञ्चित्पीतत्वं किञ्चित्स्निग्धत्वमस्ति गुरुता च
तेषामिह समवायादस्ति सुवर्णमिति सत्त्वसंघातः ॥ ८७ ॥
इदमत्र तु तात्पर्यं यत्पीतत्वं गुणः सुवर्णस्य ॥
अन्तर्लीनगुरुत्वादि वक्ष्यते तद्गुरुत्वेन ॥ ८८ ॥
ज्ञानत्वं जीवगुणस्तदिह विवक्षावशात्सुखत्वं स्यात् ॥
अन्तर्लीनत्वादिह तदेकसत्त्वं तदात्मकत्वाच्च ॥ ८९ ॥
ननु निर्गुणा गुणा इति सूत्रे सूक्तं प्रमाणतो वृद्धैः ॥
तत्किं ज्ञानं गुण इति विवक्षितं स्यात्सुखत्वेन ॥ ५९० ॥
सत्यं लक्षणभेदाद्गुणभेदो निर्विलक्षणः स स्यात् ॥
तेषां तदेकसत्त्वादखण्डितत्वं प्रमाणतोऽध्यक्षात् ॥ ९१ ॥

तस्मादनवद्यमिदं भावेनाखण्डितं सदेकं स्यात् ॥
तदपि विवक्षावशतः स्यादिति सर्वं न सर्वथेति नयात् ॥
एवं भवति सदेकं भवति न तदपि न निरंकुशं किन्तु ॥
सदनेकं स्यादिति किल सप्रतिपक्षं यथा प्रमाणाद्वा ॥
स्तः शुद्धाशुद्धे क्रियेऽथवः ॥ १८१ ॥ अथ सत्यां हि
शुद्धायां क्रियायामथवाश्रितः ॥ स्यादशुद्धा कथं वा चेद-

स्ति नित्या कथं न सा ॥ ८२ ॥ अथासत्यामशुद्धायां बन्धाभावो विरुद्धभाक् ॥ नित्यायामथ तस्यां हि सत्यां मुक्तेरसम्भवः ॥ ८३ ॥ ततः सिद्धं यदा येन भावेनात्मा समन्वितः ॥ तदाऽनन्यगतिस्तेन भावेनात्माऽस्ति तन्मयः ॥ ८४ ॥ तस्माच्छुभः शुभेनैव स्यादशुभोऽशुभेन यः ॥ शुद्धः शुद्धेन भावेन तदात्वे तन्मयत्वतः ॥ ८५ ॥ ततोऽनर्थान्तरं तेभ्यः किञ्चिच्छुद्धमनीदृशम् ॥ शुद्धं नवपदान्येव तद्विकारादृते परम् ॥ ८६ ॥ अतस्तत्त्वार्थश्रद्धानं सूत्रे सद्दर्शनं मतम् ॥ तत्तत्त्वं नव जीवाद्या यथोद्देश्याः क्रमादपि ॥ ८७ ॥ तदुद्देशो यथा जीवः स्यादजीवस्तथाश्रवः ॥ बन्धः स्यात्संवरश्चापि निर्जरा मोक्ष इत्यपि ॥ ८८ ॥ सप्तैते पुण्यपापाभ्यां पदार्थास्ते नव स्मृताः ॥ सन्ति सद्दर्शनस्योच्चैर्विषया भूतार्थमाश्रिताः ॥ ८९ ॥ तत्राधिजीवमाख्यानं विदधाति यथाऽधुना ॥ कविः पूर्वापरायत्तपर्यालोचविचक्षणः ॥ ९० ॥ जीवसिद्धिः सती साध्या सिद्धा साधीयसी पुरा ॥ तत्सिद्धलक्षणं वक्ष्ये साक्षात्तल्लब्धिसिद्धये ॥ ९१ ॥ स्वरूपं चेतना जन्तोः सा सामान्यात्सदेकधा ॥ सद्विशेषादपि द्वेधा क्रमात्सा

नाक्रमादिह ॥ ९२ ॥ एका स्याच्चेतना शुद्धा स्यादशुद्धा परा ततः ॥ शुद्धा स्यादात्मनस्तत्त्वमस्त्यशुद्धात्मकर्मजा ॥ ९३ ॥ एकधा चेतना शुद्धा शुद्धस्यैकविधत्वतः ॥ शुद्धाशुद्धोपलब्धित्वाज्ज्ञानत्वाज्ज्ञानचेतना ९४ अशुद्धा चेतना द्वेधा तद्यथा कर्मचेतना ॥ चेतनत्वात्फलस्यास्य स्यात्कर्मफलचेतना ॥ ९५ ॥ अत्रात्मा ज्ञानशब्देन वाच्यस्तन्मात्रतः स्वयम् ॥ स चेत्यतेऽनया शुद्धः शुद्धा सा ज्ञानचेतना ॥ ९६ ॥ अर्थाज्ज्ञानं गुणः सम्यक्प्राप्तावस्थान्तरं यदा ॥ आत्मोपलब्धिरूपं स्यादुच्यते ज्ञानचेतना ॥ ९७ ॥ सा ज्ञानचेतना नूनमस्ति सम्यग्दृगात्मनः ॥ न स्यान्मिथ्यादृशः क्वापि तदात्वे तदसम्भवात् ॥ ९८ ॥ अस्ति चैकादशाङ्गानां ज्ञानं मिथ्यादृशोऽपि यत् ॥ नात्मोपलब्धिरस्यास्ति मिथ्याकर्मोदयात्परम् ॥ ९९ ॥ ननूपलब्धिशब्देन ज्ञानं प्रत्यक्षमर्थतः ॥ तत्किं ज्ञानावृतेः स्वीयकर्मणोऽस्त्यत्र तत्क्षतिः ॥ २०० ॥ सत्यं स्वावरणस्योच्चैर्मूलं हेतुर्यथोदयः ॥ कर्मान्तरोदयापेक्षो नासिद्धः कार्यकृद्यथा ॥ १ ॥ अस्ति मत्यादि यज्ज्ञानं ज्ञानावृत्युदयक्षतेः ॥ तथा वीर्यान्तरायस्य कर्मणोऽनुदयादपि ॥ २ ॥ मत्याद्यावरणस्योच्चैः कर्मणोऽ

इयं संसारिजीवानां सर्वेषामविशेषतः ॥ अस्ति साधारणी वृत्तिर्न स्यात्सम्यक्त्वकारणम् ॥ १४ ॥ न स्यादात्मोपलब्धिर्वा सम्यग्दर्शनलक्षणम् ॥ शुद्धा चेदस्ति सम्यक्त्वं न चेच्छुद्धा न सा सुदृक् ॥ १५ ॥ ननु चेयमशुद्धैव स्यादशुद्धा कथंचन ॥ अथ बन्धफला नित्यं किमबन्धफला क्वचित् ॥ १६ ॥ सत्यं शुद्धाऽस्ति सम्यक्त्वे सैवाशुद्धाऽस्ति तद्विना ॥ अस्त्यबन्धफला तत्र सैव बन्धफलाऽन्यथा ॥ १७ ॥ ननु सद्दर्शनं शुद्धं स्यादशुद्धा मृषा रुचिः ॥ तत्कथं विषयश्चैकः शुद्धाशुद्धविशेषभाक् ॥ १८ ॥ यद्वा नवसु तत्त्वेषु चास्ति सम्यग्दृगात्मनः ॥ आत्मोपलब्धिमात्रं वै सा चेच्छुद्धा कुतो नव ॥ ॥१९ ॥ नैवं यतः स्वतः शश्वत्स्वादुभेदोऽस्ति वस्तुनि ॥ तत्राभिव्यञ्जकद्वैधाभावसद्भावतः पृथक् ॥ २२० ॥ शुद्धं सामान्यमात्रत्वादशुद्धं तद्विशेषतः ॥ वस्तु सामान्यरूपेण स्वदते स्वादु सद्विदाम् ॥ २१ ॥ स्वदते न परेषां तद्विशेषेऽप्यनीदृशम् ॥ तेषामलब्धबुद्धित्वाद्‌दृष्टेर्दृङ्मोहदोषतः ॥ २२ ॥ यद्वाविशेषरूपेण स्वदते तत्कुदृष्टिनाम् ॥ अर्थात्सा चेतना नूनं कर्मकार्येऽथ कर्मणि ॥ २३ ॥

दर्शनं स्पृहा ॥ मोक्षनिष्प्रपञ्चं नियतं शाश्वतपदम्
॥ ३४ ॥ कषायदवशात्पूर्वं शुभं मिथ्यादर्शनम् ॥
कुन्दकुन्दैर्देवेन्द्रैः निःशङ्कं ध्यातमस्मरा ॥ ३५ ॥ ज्ञा-
निध्यानविधानज्ञानदर्शनमूर्तिकम् ॥ अज्ञानिनागत-
नन्तस्याधिकमृत्युरिष्यते ॥ ३६ ॥ यदानिशं निजा-
त्मानं ज्ञानी ज्ञानमूर्तिमान् ॥ समताद्भवं चेन्द्रियार्था-
न्स्वार्थं कृतार्थवत् ॥ ३७ ॥ यैन्द्रियकं यत्सुखं नाम सर्वं
वैषयिकं स्मृतम् ॥ न तत्सुखं सुखाभासं किन्तु दुःख-
मसंशयम् ॥ ३८ ॥ तस्मात्तदेवं सुखाभासं दुःखं दुःख-
फलं यतः ॥ हेयं तत्कर्म यज्जैनैस्त्यानिष्टम्य सर्वतः ॥
३९ ॥ तत्सर्वं सर्वतः कर्म पौद्गलिकं तदष्टधा ॥ वैप-
रीत्यात्फलं तस्य सर्वं दुःखं विपच्यतः ॥ ४० ॥ चतु-
र्गतिभवावर्ते नित्यं कर्मैकहेतुकं ॥ न पदस्थो जनः कश्चि-
त्किन्तु कर्मपदस्थितः ॥ ४१ ॥ स्वस्वरूपाच्च्युतो जीवः
स्यादलब्धस्वरूपवान् ॥ नानादुःखसमाकीर्णे संसारे
पर्यटन्निति ॥ ४२ ॥ ननु किञ्चिच्छुभं कर्म किञ्चित्कर्मा-
शुभं ततः ॥ क्वचित्सुखं क्वचिद्दुःखं तत्किं दुःखं परं
नृणाम् ॥ ४३ ॥ नैवं यतः सुखं नैनत्तत्सुखं यत्र ना-

सुखदम् ॥ स धर्मो यत्र नाधर्मस्तत्सुखं यत्र नासुखम् ॥ ४४ ॥ इदमेव पराधीनं सुखं बाधासमन्वितम् ॥ स्वर्गेऽप्यन्तं कर्मचेनुष विषमं दुःखमेव तत् ॥ ४५ ॥ उक्तं च — सपरं बाधासहियं विच्छिण्णं बंधकारणं विसमम् ॥ जं इन्दियेहि लद्धं तं सुक्खं दुक्खमेव तहा ॥ ४६ ॥ भावार्थश्चात्र सर्वेषां कर्मणामुदयः क्षणात् ॥ बलाघात इवाघातं कुर्वाणो निष्पिनष्टि वै ॥ ४७ ॥ व्याकुलः सर्वदेशेषु जीवः कर्मोदयाद्ध्रुवम् ॥ वह्नियोगाद्यथा वारि तप्तं स्पर्शोपलब्धितः ॥ ४८ ॥ साताऽसातोदयाद्दुःखमात्मा स्थूलोपलक्षणात् ॥ सर्वकर्मोदयाघात इवाघातशिलात्मनः ॥ ४९ ॥ आत्मा घातः प्रदेशेषु सन्दृष्टरूपलक्षितः ॥ वातव्याधिर्यथाऽध्यक्षं पीड्यन्ते ननु सन्धयः ॥ ५० ॥ न हि कर्मोदयः कश्चिज्जन्तोर्यः स्यात्सुखावहः ॥ सर्वस्य कर्मणस्तत्र वैलक्षण्यात्स्वरूपतः ॥ ५१ ॥ तस्य मन्दोदयात्केचिज्जीवाः समनस्काः क्वचित् ॥ तद्वेगमसहमाना रमन्ते विषयेषु च ॥ ५२ ॥ केचित्तीव्रोदयाः सन्तो मन्दाक्षाः स्वल्पसंज्ञिनः ॥ केवलं दुःखवेगार्ता रन्तुं नार्थानपि क्षमाः ॥ ५३ ॥ यद्दुःखं लौकिकी

रुचिर्मिथ्यादृशामत्र का कथा ॥ यन्मुखं लौकिकी रुचि-स्तन्मुखं दुःखमर्थतः ॥ २५४ ॥ कादाचित्कं न तद्दुःखं प्रत्युताच्छिन्नधारया ॥ सन्निकर्षेषु तेषूच्चैस्तृष्णातङ्कस्य दर्शनात् ॥ ५५ ॥ इन्द्रियार्थेषु लुब्धानामन्तर्दाहः सुदारुणः ॥ तमन्तरा यतस्तेषां विषयेषु रतिः कुतः ॥ ५६ ॥ दृश्यते रतिरेतेषां सुहितानामिवेक्षणात् ॥ तृष्णाबीजं जलौकिकानां दुष्टशोणितकर्षणात् ॥ ५७ ॥ शक्रचक्रधरादीनां केवलं पुण्यशालिनाम् ॥ तृष्णाबीजं रतिस्तेषां सुखावाप्तिः कुतस्तनी ॥ ५८ ॥ उक्तं च— जेसिं विसये सुरदि तेसिं दुक्खं वजाजाण साहावम् ॥ जदि तं णत्थि सहावं वावारो णत्थि विसयत्थम् ॥ ५९ ॥ सर्वं तात्पर्यमत्रैतद्दुःखं यत्सुखसंज्ञकम् ॥ दुःखस्यानात्मधर्मत्वान्नाभिलाषः सुदृष्टिनाम् ॥ २६० ॥ वैषयिकसुखे न स्याद्रागभावः सुदृष्टिनाम् ॥ रागस्याज्ञानभावत्वादस्ति मिथ्यादृशः स्फुटम् ॥ ६१ ॥ सम्यग्दृष्टेस्तु सम्यक्त्वं स्यादवस्थान्तरं चितः ॥ सामान्यमनवत्तस्मान्नाभिलाषोऽस्य कर्मणि ॥ ६२ ॥ उपेक्षा सर्वभोगेषु सद्दृष्टेर्दृष्टरोगवत् ॥ अवश्यं तदवस्थायास्तथाभावो निसर्गजः ॥ ६३ ॥ अस्तु रूढिर्यथा

ज्ञानी हेयं ज्ञात्वाऽथ मुञ्चति ॥ अत्रास्त्यावश्यिकः कश्चि-
त्परिणामः मतनुरुः ॥ ६४ ॥ सिद्धमस्त्यभिलाषत्वं कस्य-
चित्सर्वतश्चितः ॥ देशतोऽप्यस्मदादीनां रागाभावस्य
दर्शनात् ॥ ६५ ॥ तद्यथा न मदीयं स्याद्न्यदीयमिदं
ततः ॥ परमकरणे कश्चित्तृप्यन्नपि न तृप्यति ॥ ६६ ॥
यथा कश्चित्परायत्तः कुर्वाणोऽनुचितां क्रियाम् ॥ कर्ता
तस्याः क्रियायाश्च न स्यादस्ताभिलाषवान् ॥६७॥ स्वदते
ननु सद्दृष्टिरिन्द्रियार्थकदम्बकम् ॥ तवेदं शेमंतं तस्य
कथमस्त्वाभिलाषवान् ॥ ६८ ॥ सत्यमेतादृशो यावज्जघ-
न्यं पदमाश्रितः ॥ चारित्रावरणं कर्म जघन्यपदकारणम्
॥ ६९ ॥ तदर्थेषु रतो जीवश्चारित्रावरणोदयात् ॥ तद्वि-
ना सर्वतः शुद्धो वीतरागोऽस्त्यतीन्द्रियः ॥ २७० ॥
दृष्टोऽस्य क्लेशतस्य नूनं भोगाननिच्छतः ॥ हेतुसद्भाव-
तोऽवश्यमुपभोगक्रियाक्षतात् ॥ ७१ ॥ नासिद्धं तद्विरा-
गत्वं क्रियामात्रस्य दर्शनात् ॥ जगतोऽनिच्छतोऽप्यस्ति
दारिद्र्यं मरणादि च ॥ ७२ ॥ व्याधीडितो जनः कश्चि-
त्कुर्वाणो रुक्प्रतिक्रियाम् ॥ तदात्वे कर्मजं नेच्छत्का
कथा रुक्पुनर्भवे ॥ ७३ ॥ कर्मणा पीडितो ज्ञानी कुर्वाणः

ज्ञानी ह्येवं ज्ञात्वाऽथ मुच्यति ॥ यथाहल्याचरित्रतः कश्चि-
त्परिणामः संश्रुतः ॥ ६४ ॥ सिद्धमतोऽभिप्रायेणं फल-
मिदमेवतथितः ॥ देहतोऽप्यमृतादीनां प्रागभावस्य
दर्शनात् ॥ ६५ ॥ तथया न यदीयं स्यादन्यदीयमिदं
मतः ॥ परमकारणे कश्चित्तृष्णमपि न मृष्यति ॥ ६६ ॥
यथा कश्चित्परायतः कुर्वाणोऽनुचितां क्रियाम् ॥ कर्ता
तस्या क्रियायाश्च न स्यादन्याभिप्रायतः ॥ ६७ ॥ स्वदेहे
ननु सद्दाहिनिन्द्रियार्थेऽदम्भतम् ॥ नवैदं सेवन मतं
कायमनोऽभिप्रायतः ॥ ६८ ॥ तत्पदेनात्मनां यावत्प्रत्य-
क्ष्यं पदमाश्रितः ॥ चारित्रावरणं सर्वं भवन्त्यदृष्टकारणम्
॥ ६९ ॥ तद्दर्पेषु रतो जीवश्चारित्रावरणोदयात् ॥ नाह-
न्ता सर्वतः शुद्धो वीतरागोऽप्यतीन्द्रियः ॥ ७० ॥
एवमोदस्य सेवनस्य नूनं भोगाननिष्टजः ॥ हेतुमत्तादस्य
तोऽप्यस्तूपभोगनिवारणात् ॥ ७१ ॥ नापि स्वदेहे स्वदान
मात्रं मिथ्याभावस्य दर्शनात् ॥ अतनोऽनिन्दितालाभात्त
दारिद्र्यं मरणादि च ॥ ७२ ॥ प्राप्ते सन्तानस्थाननित्य-
दृष्टपीलो स्वपतिक्रियाम् ॥ स्वयोर्वधोद्दिष्टस्य कर्मतः ॥
कथा दृष्टपुनर्भवे ॥ ७३ ॥ नोहृदयान्तरं स्मृतः ॥ ९४ ॥

स्पर्शादिमत्त्व किं कल्पयन्ति ते घटाः ॥ ५५ ॥ घटाः स्पर्शादिमः सौख्यं ज्ञानमुत्पादयन्ति चेत् ॥ घटादौ ज्ञानशून्ये च तत्किं नोत्पादयन्ति ते ॥ ५६ ॥ अथ चेच्चेतने द्रव्ये ज्ञानस्योत्पादकाः क्वचित् ॥ चेतनत्वात्स्वयं तस्य किं नोत्पादयन्ति वा ॥ ५७ ॥ ततः सिद्धं शरीरस्य पञ्चाक्षाणां तदर्थसात् ॥ अस्त्यकिञ्चित्करत्वं तच्चितो ज्ञानं सुखम्प्रति ॥ ५८ ॥ ननु देहेन्द्रियार्थेषु सत्सु ज्ञानं सुखं नृणाम् ॥ असत्सु न सुखं ज्ञानं तदकिञ्चित्करं कथम् ॥ ५९ ॥ नैवं यतोऽन्वयापेक्षे व्यञ्जके हेतुदर्शनात् ॥ कार्याभिव्यञ्जकः कोऽपि साधनं न विनाऽन्वयम् ॥ ६० ॥ दृष्टान्तोऽगुरुगन्धस्य व्यञ्जकः पावको भवेत् ॥ न स्याद्विनाऽगुरुद्रव्यं गन्धस्त्पावकस्य सः ॥ ६१ ॥ तथा देहेन्द्रियं चार्थाः सन्त्यभिव्यञ्जकाः क्वचित् ॥ ज्ञानस्य तथा सौख्यस्य न स्वयं चित्सुखात्मकाः ॥ ६२ ॥ नाप्युपादानशून्येऽपि स्यादभिव्यञ्जकात्सुखम् ज्ञानं वा तत्र सर्वत्र हेतुशून्यानुषङ्गतः ॥ ६३ ॥ ततः सिद्धं गुणो ज्ञानं सौख्यं जीवस्य वा पुनः ॥ संसारे वा समुक्तौ वा गुणानामनतिक्रमात् ॥६४

सिद्धं साधारणं ज्ञानं सुखं संसारपर्यये ॥ तन्निवारणं मुक्तौ ज्ञानं वा सुखमात्मनः ॥ ६५ ॥ कर्मणां विप्रमुक्तौ तु नूनं नात्मगुणक्षतिः ॥ प्रत्युतातीव नैर्मल्यं पङ्कापाये जलादिवत् ॥ ६६ ॥ अस्ति कर्ममलापाये विकारस्य विरामनः ॥ विकारः कर्मणां भावः कादाचित्कः सपर्ययः ॥ ६७ ॥ नष्टे चाशुद्धपर्याये मा भूद्वा निर्गुणक्षये ॥ ज्ञानानन्दत्वमस्योच्चैर्नित्यत्वात्परमात्मनि ॥ ६८ ॥ रूप्यादिमलापाये यथा पावकयोगतः ॥ पीतत्वादिगुणाभावो न स्यात्कार्त्स्न्येतरोऽस्ति चेत् ॥ ६९ ॥ एतावता हि दुःखानां मोक्षो निर्मोक्षलक्षणः ॥ इत्येके तदसमञ्जसं गुणानां शून्यसाधनात् ॥ १७० ॥ न स्यान्निजगुणव्यक्तिरात्मनो दुःखसाधनम् ॥ सुखस्य मूलतो नाशादनिष्टत्वानुषङ्गतः ॥ ७१ ॥ निश्चितं ज्ञानरूपस्य सुखरूपस्य वा पुनः ॥ देहेन्द्रियैर्विनाऽप्यस्ति ज्ञानानन्दौ परात्मनः ॥ ७२ ॥ इत्येवं ज्ञानवन्तोऽसौ सम्यग्दृष्टिर्निजात्मदृक् ॥ वैषयिके सुखे ज्ञाने रागद्वेषौ परित्यजेत् ॥ ७३ ॥ ननूक्तेश्च किमेतावतास्ति किं वा परोऽप्यतः ॥ लक्ष्यते येन सद्दृष्टिर्लक्षणेनान्वितः पुमान् ॥ ७४ ॥ अपराण्यपि लक्ष्माणि

सन्ति सम्यग्दृशात्मनः ॥ सम्यक्त्वेनाऽविनाभूतं न
संलक्ष्यते सुदृक् ॥ ७५ ॥ तत्कथाश्रयं सुखं ज्ञानमनादेयं
दृगात्मनः ॥ नादेयं कर्म सर्वं च तद्वद्दृष्टोपलक्षितः
॥ ७६ ॥ सम्यक्त्वं वस्तुतः सूक्ष्मं केवलज्ञानगो
चरम् ॥ गोचरं स्वावधिस्वान्तपर्ययज्ञानयोर्द्वयोः ॥ ७७ ॥
न गोचरं मतिज्ञानश्रुतज्ञानद्वयीमिनाक् ॥ नापि देशावधेस्तत्र
विषयोऽनुपलब्धितः ॥ ७८ ॥ यः स्यात्मनो गुणः कश्चि
त्सम्यक्त्वं निर्विकल्पकम् तद्दृष्टो द्वारगामित्वतः स्याद्
सूपमनाहितः ॥ ७९ ॥ दैवात्कालादिसंलब्धौ प्रत्यासन्ने
भवार्णवे ॥ भव्यभावविपाकाद्वा जीवः सम्यक्त्वमश्नुते
॥ ८० ॥ प्रयत्नमन्तरेणापि दृङ्मोहोपशमो भवेत् ।
अन्तर्मुहूर्तमात्रं च गुणश्रेण्यनतिक्रमात् ॥ ८१ ॥ अस्त्यु-
पशमसम्यक्त्वं दृङ्मोहोपशमाद्यथा ॥ पुंसोऽवस्थान्तराकारं
नाकारं चिद्विकल्पके ॥ ८२ ॥ सामान्याद्वा विशेषाद्वा
सम्यक्त्वं निर्विकल्पकम् ॥ सत्तारूपं च परिणामि प्रदेशेषु
परं चितः ॥ ८३ ॥ तत्रोल्लेखस्तमोनाशे तमोऽरिव
रश्मिभिः ॥ दिशः प्रसत्तिमासेदुः सर्वतो विमलाशयाः
॥ ८४ ॥ दृङ्मोहोपशमे सम्यग्दृष्टेरुल्लेख एव सः ॥ ८५

न्ये सर्वदेशेषु मिथ्या कन्यायदाय यत ॥ ८६ ॥ यथा वा मद्यधत्तूरपाकस्यास्वादनात्किल ॥ उद्दंडो मूर्छितो मत्तः स्यादमूढेतः ॥ ८७ ॥ हृद्रोगोदरास्पृष्टावीचित्वं वा तथा भ्रमः ॥ यथार्थे स्वस्य गुच्छया मा।आत्मोबो निरामयः ॥ ८७ ॥ श्रद्धानादिगुणा बाह्यं लक्ष्यं सम्यक्त्वलक्षणः ॥ न सम्यक्त्वं तदेव न मति ज्ञानस्य पर्ययाः ॥ ८८ ॥ अपि नित्यानुभूतिस्तु ज्ञाने ज्ञानस्य पर्ययात् ॥ अर्थात् ज्ञानं न सम्यक्त्वमस्ति चेद्वाह्यलक्षणम् ॥ ८९ ॥ यथ.लाग्या हि दुर्लक्ष्या लक्ष्यते स्थूललक्षणैः ॥ वा मनःकायवचानां उत्साहादिगुणात्मकैः ॥ ९० ॥ तत्रात्मानुभवः साक्षात्सम्यक्त्वं वस्तुतः स्वयम् ॥ सर्वतः सर्वकालेऽस्य मिथ्यादृष्टेरसम्भवात् ॥ ९१ ॥ नैवं यतोऽनभिज्ञोऽसि सत्सामान्यविशेषयोः ॥ अप्यनाकारसाकारलिङ्गयोस्तद्यथोच्यते ॥ ९२ ॥ आकारोऽर्थविकल्पः स्यादर्थः स्वपरगोचरः ॥ सोपयोगो विकल्पो वा ज्ञानस्यैतद्धि लक्षणम् ॥ ९३ ॥ नाकारः स्यादनाकारो वस्तुतो निर्विकल्पता ॥ शेषानन्तगुणानां तल्लक्षणं ज्ञानमन्तरा ॥ ९४ ॥ नन्वस्ति वास्तवं सर्वं

सत्सामान्यं विशेषवत्॥ तत्रैकं किंचिदनाकारं किंचित्सा-
कारमेव तत् ॥ ९५ ॥ सत्वं सामान्यवज्ज्ञानं दर्शनाच्च
विशेषवत् ॥ यत्सामान्यमनाकारं साकारं यद्विशेषभाक्
॥ ९६ ॥ ज्ञानाद्विना गुणाः सर्वे प्रोक्ताः सल्लक्षणाङ्कि-
ताः ॥ सामान्याद्वा विशेषाद्वा सत्यं नाकारमात्रकाः ॥
॥ ९७ ॥ ततो वक्तुमशक्यत्वान्निर्विकल्पस्य वस्तुनः ॥
तदुल्लेखं समालेख्य ज्ञानद्वारा निरूप्यते ॥ ९८ ॥ स्वा-
पूर्वार्थद्वयोरेव ग्राहकं ज्ञानमेकशः ॥ नात्र ज्ञानमपूर्वार्थो
ज्ञानं ज्ञानं परः परः ॥ ९९ ॥ स्वार्थो वै ज्ञानमात्रस्य
ज्ञानमेकं गुणश्चिनः ॥ परार्थस्स्वार्थसम्बन्धी गुणाः शेषे
सुखादयः ॥ ४०० ॥ तद्यथा सुखदुःखादिभावो जीव-
गुणः स्वयम् ॥ ज्ञानं तद्वेदकं नूनं नार्थाज्ज्ञानं सुखादि-
मत् ॥ १ ॥ सम्यक्त्वं वस्तुतः सूक्ष्ममस्ति वाचामगोच-
रम् ॥ तस्माद्वक्तुं च श्रोतुं च नाधिकारी विधिक्रमात् ॥
२ ॥ प्रसिद्धं ज्ञानमेवैकं साधनादिविधौ चितः ॥ स्वा-
नुभूत्येकहेतुश्च तस्मात्तत्परमं पदम् ॥ ३ ॥ तत्राप्यात्मानु-
भूतिः सा विशिष्टं ज्ञानमात्मनः ॥ सम्यक्त्वेनाविना-
भूतमन्वयाद्व्यतिरेकतः ॥ ४ ॥ ततोऽस्ति योग्यता वक्तुं

व्याप्तिः सद्भावसत्तयोः ॥ सम्यक्त्वं स्वानुभूतिः स्यात्सा
चेच्छुद्धनयात्मिका ॥ ५ ॥ किंचास्ति विषमव्याप्तिः
सम्यक्त्वानुभवद्वयोः ॥ नोपयोगे समव्याप्तिरस्ति ल-
ब्धिविधौ तु सा ॥ ६ ॥ तद्यथा स्वानुभूतौ वा तत्काले
वा तदात्मनि ॥ अस्त्यवश्यं हि सम्यक्त्वं यस्मात्सा न
विनाऽपि तत् ॥ ७ ॥ यदि वाऽसति सम्यक्त्वे ॥
स्याद्वा नोपयोगवान् ॥ शुद्धस्यानुभवस्तत्र लब्धिरू-
पोऽस्ति वस्तुतः ॥ ८ ॥ हेतुस्तत्रापि सम्यक्त्वोत्पत्ति-
कालेऽस्त्यवश्यतः ॥ तज्ज्ञानावरणस्योच्चैरस्त्यवस्थान्तरं
स्वतः ॥ ९ ॥ यस्मात् ज्ञानमनित्यं स्याच्छद्मस्थस्योप-
योगवत् ॥ नित्यं ज्ञानमछद्मस्थे छद्मस्थस्य च लब्धि-
मत् ॥ ४१० ॥ नित्यं सामान्यमात्रत्वात्सम्यक्त्वं नि-
र्विशेषतः ॥ तत्सिद्धा विषमव्याप्तिः सम्यक्त्वानुभव-
द्वयोः ॥ ११ ॥ अपि सन्ति गुणाः सम्यक्श्रद्धानादि-
विकल्पकाः ॥ उद्देशो लक्षणं तेषां तत्परीक्षाऽधुनोच्यते
॥ १२ ॥ तत्रोद्देशो यथा नाम श्रद्धारुचिप्रतीतयः ॥
चरणं च यथाम्नायमर्थात्तत्त्वार्थगोचरम् ॥ १३ ॥
तत्त्वार्थाभिमुखी बुद्धिः श्रद्धा सात्म्यं रुचिस्तथा ॥ प्रती-

शुद्धस्यानुभवोऽथवा ॥ तत्फलं सुखमत्यक्षमक्षयं क्षायिकं च यत् ॥ ३४ ॥ इतरत्र पुना रागस्तद्गुणेष्वनुरागतः नातद्गुणेऽनुरागोऽपि तत्फलस्याप्यलिप्सया ॥ ३५ ॥ अत्रानुरागशब्देन नाभिलाषो निरुच्यते ॥ किन्तु शेषमधर्माद्वा निवृत्तिस्तत्फलादपि ॥ ३६ ॥ अथानुरागशब्दस्य विधिर्वाच्यो यदार्थतः ॥ प्राप्तिः स्यादुपलब्धिर्वा शब्दाश्चैकार्थवाचकाः ॥ ३७ ॥ न चाशंक्यं निषिद्धः स्यादभिलाषो भोगेष्वलम् ॥ शुद्धोपलब्धिमात्रेऽपि हेयो भोगाभिलाषवत् ॥ ३८ ॥ अर्थात्सर्वोऽभिलाषः स्यादज्ञानं दृग्विपर्ययात् ॥ न्यायादलब्धतत्त्वार्थो लब्धुं कामो न लब्धिमान् ॥ ३९ ॥ मिथ्या सर्वोऽभिलाषः स्यान्मिथ्याकर्मोदयात्परम् ॥ स्वार्थसार्थक्रियासिध्दै नालं प्रत्यक्षतो यतः ॥ ४४० ॥ क्वचित्तस्यापि सद्भावे नेष्टसिद्धिरहेतुतः ॥ अभिलाषस्याप्यभावे स्वेष्टसिद्धिश्च हेतुतः ॥ ४१ ॥ यशःश्रीसुतमित्रादि सर्वं कामयते जगत् ॥ नास्य लाभोऽभिलाषेऽपि विना पुण्योदयात्सतः ॥ ४२ ॥ जरामृत्युदरिद्रादि न हि कामयते जगत् ॥ तत्संयोगो बलादस्ति सतस्तत्राशु-

मोदयात् ॥ ४३ ॥ संवेगो विधिरूपः स्यान्निषेधश्च
निषेधनात् ॥ स्याद्विवक्षावशाद्द्वैतं नार्थादर्थान्तरं तयोः
॥ ४४ ॥ त्यागः सर्वाभिलाषस्य निर्वेदो लक्षणात्तथा ॥
स संवेगोऽथवा धर्मः साभिलाषो न धर्मवान् ॥ ४५ ॥
नापि धर्मः क्रियामात्रं मिथ्यादृष्टेरिहार्थतः ॥ नित्यं
रागादिसद्भावात् प्रत्युताधर्म एव सः ॥ ४६ ॥ नित्यं
रागी कुदृष्टिः स्यान्न स्यात्कचिदरागवान् ॥ अस्तरागोऽ
स्ति सद्दृष्टिर्नित्यं वा स्यान्न रागवान् ॥ ४७ ॥ अनुकम्पा
क्रिया ज्ञेया सर्वसत्त्वेष्वनुग्रहः ॥ मैत्रीभावोऽथ माध्यस्थं
निःशल्यं वैरवर्जनात् ॥ ४८ ॥ दृङ्मोहानुदयस्तत्र हेतुर्वा
च्योऽस्ति केवलम् ॥ मिथ्याज्ञानं विना न स्याद्वैरभावः
क्वचिद्यतः ॥ ४९ ॥ मिथ्या यत्परतः स्वस्य स्ववधाद्वा
परजन्मिनाम् ॥ इच्छेत्तत्सुखदुःखादि मृत्युर्वा जीवितं
मनाक् ॥ ५० ॥ अस्ति यस्यैतदज्ञानं मिथ्यादृष्टिः स
शल्यवान् ॥ अज्ञानादन्तुकामोऽपि क्षमो हन्तुं न चापरम्
॥ ५१ ॥ समता सर्वभूतेषु याऽनुकम्पा परत्र सा ॥
अर्थतः स्वानुकम्पा स्याच्छल्यवच्छल्यवर्जनात् ॥ ५२ ॥
रागाद्यशुद्धभावानां सद्भावे बन्ध एव हि ॥ न बन्धः

[illegible] भवन्ति मारुतान-
[illegible] ॥ ५५३ ॥ [illegible]
[illegible] ॥ ५५ ॥ [illegible]
[illegible] ॥ ५५ ॥ [illegible]
[illegible] ॥ [illegible]
॥ ५६ ॥ [illegible] यथा कवित्वगद्यशी [illegible] ॥
[illegible] ॥ ५९ ॥ यथा-
दिव [illegible] मार्गो भूमे विष्णवाहमपि मः ॥ यदा
नास्ति स [illegible] ॥ ५५४ ॥
[illegible] योगाभिलाषतः ॥ [illegible]
[illegible] ॥ ५५ [illegible]
[illegible]
[illegible]
मन्दोऽपि प्रवर्तते ।
[illegible] ॥ ५७ ।
[illegible] ॥ [illegible]
[illegible] ॥ ५८ ॥ न,
[illegible]
[illegible] ॥

वत् ॥ ५९ ॥ यतः सिध्दं प्रमाणाद्वै नूनं बन्धफला क्रिया ॥ अर्वाक् क्षीणकषायेभ्योऽवश्यं तध्देतुसम्भवात् ॥ ५६० ॥ सरागे वीतरागे वा नूनमौदयिकी क्रिया ॥ अस्ति बन्धफलाऽवश्यं मोहस्यान्यतमोदयात् ॥ ६१ ॥ न वाच्यं स्यादात्मदृष्टिः कश्चित्प्रज्ञापराधतः ॥ अपि बन्धफलां कुर्यात्तामबन्धफलां विदन् ॥ ६२ ॥ यतः प्रज्ञाविनाभूतमस्ति सम्यग्विशेषणम् ॥ तस्याश्चाभावतो नूनं कुतस्त्या दिव्यता दृशः ॥ ६३ ॥ नैवं यतः सुसिध्दं प्रागीरेन चानिच्छतः क्रिया ॥ शुभायाश्चाशुभायाश्च कोऽवशेषो विशेषभाक् ॥ ६४ ॥ नन्वनिष्टार्थसंयोगरूपा साऽनिच्छतः क्रिया ॥ विशिष्टेष्टार्थसंयोगरूपा साऽनिच्छतः कथम् ॥६५॥ सत्क्रिया व्रतरूपा स्यादर्थान्नानिच्छतः स्फुटम् ॥ तस्याः स्वतन्त्रसिद्धत्वात्सिध्दं कर्तृत्वमर्थसात् ॥ ६६ ॥ नैवं यतोऽस्त्यनिष्टार्थः सर्वः कर्मोदयात्मकः ॥ तस्मान्नाकांक्षते ज्ञानी यावत्कर्म च तत्फलम् ॥ ६७ ॥ यत्पुनः कश्चिदिष्टार्थोऽनिष्टार्थः कश्चिदर्थसात् ॥ तत्सर्वं दृष्टिदोषत्वात्पीतशंखावलोकवत् ॥ ६८ ॥ दृङ्मोहस्यात्यये दृष्टिः साक्षात्सूक्ष्मार्थदर्शिनी ॥ तस्या-

निष्टऽन्यनिष्टार्थबुद्धिकर्मकत्वात्मके ॥ ६९ ॥ न चा-
मिष्टमनिष्टं कर्मणामनन्तरस्य च ॥ सर्वतो दुःखहे-
तुत्वाद्युक्तिस्यानुभवागमात् ॥ १७० ॥ अनिष्टफलत्व-
त्वान्यायाऽनिष्टायां प्रतिक्रिया ॥ दृष्टकार्यानुकारस्य देवो-
द्वेषोपदेशतः ॥ ७१ ॥ यथाभिष्टं स्वतन्त्रं क्रियायाः
कर्मणः फलात् ॥ कृते कर्मोऽप्यदृष्टेनामन्यायागमम-
यो यतः ॥ ७२ ॥ यावद्दर्शनमोक्षस्य दीपमोक्षस्य
चात्मनः ॥ यावन्त्यपि क्रियानाम तावन्त्यौदयिकी स्मृता
॥ पौरुषो न यथाकामं पुंसः कर्मोदितं यदि ॥ न यदं
पौरुषांशः दैवांशा हि पौरुषः ॥ ७४ ॥ निद्रा
निःकालिता प्राणी कुर्वाणोऽप्यन्निता क्रियात् ॥ निद्रा-
मनः कृतं कर्म न बाधाय निगादिनाम् ॥ ७५ ॥
नाज्ञत्वं चास्ति निकाशे मायान्तरेऽपि मनः कवित् ॥
देवो गुणनिष्ठत्वाच्च दर्शनानिश्चयादपि ॥ ७६ ॥ यदि
निद्राऽस्ता नास्ति व्यापारदर्शनं विना ॥ नानिष्टाद्य-
ति मोक्षं तदन्यत्रानिष्टतः ॥ ७७ ॥ तदन्यत्रापूर्व
मोहानिष्टदादृष्टः न नेष्टांत ॥ इष्यतेऽत यथा यतः
सन्तः सदावर्णोऽनिषम् ॥ ७८ ॥ उक्तो निष्कानितो

सद्विशेषेऽपि सम्मोहाद्द्वयोरेकतरोपलब्धिरतः ॥ ८९ ॥
न्युक्तो युक्तिपूर्वोऽसौ गुणः सद्दर्शनस्य च ॥ नाविचा
हि दोषाय विचक्षा न गुणायवे ॥ ९० ॥ अपि च
मूढदृष्टि मा सम्यग्दर्शनशालिनी ॥ यथाऽस्वैकृतवपुर्वे
तत्राति सद्दर्शनं नाम ॥ ९१ ॥ अस्ति तत्त्वश्रद्धा
मूढदृष्टिः स्वतत्त्वगाद् । नास्ति सा यस्य जीवस्य वि
ख्यातः सोऽस्त्यमूढदृक् ॥ ९२ ॥ अस्त्यतत्त्वेऽनुतत्त्वश्रद्धानै
मिथ्यार्थः सार्थितोऽपरैः ॥ नास्त्यत्र मोहाय
दृङ्नाहरुद्योऽस्य ॥ ९३ ॥ तत्त्वानतिरिक्तमर्थे दर्शि
तेऽपि कुदृष्टिभिः ॥ नास्तिसुरक्ष मुक्तः [illegible] त्वतन्त्रदृ-
श्रुतः ॥ ९४ ॥ अथासामपि [illegible] सम्यग्दर्शन
मूढता ॥ सूक्ष्मान्तरितदूरार्थाभावाच्छात्रवस्य कुतो भ्रम ॥
९५ ॥ तद्यथा लौकिकी रूढिरस्ति नानाविकल्पसात् ॥
निःसारैराश्रिता पुंभिरथानिष्टफलप्रदा ॥ ९६ ॥ अफ-
लानिष्टफला हेतुशून्या योगापहारिणी ॥ दुस्त्याज्या
लौकिकी रूढिः कैश्चिद्दुष्कर्मपाकतः ॥ ९७ ॥ अदेवे
देवबुद्धिः स्यादधर्मे धर्मधीरिह ॥ अगुरौ गुरुबुद्धिर्या-
ख्याता देवादिमूढता ॥ ९८ ॥ कुदेवाराधनं कुर्यादैहि-

शुध्दात्मलब्धितः ॥ अर्हन्निति च सिध्दश्च पर्यायार्थो
द्विधा मतः ॥ ९ ॥ दिव्यौदारिकदेहस्थो धौतघातिच-
तुष्टयः ॥ ज्ञानदृग्वीर्यसौख्याढ्यः सोऽर्हन् धर्मो-
पदेशकः ॥ १० ॥ मूर्तिमद्देहनिर्मुक्तो मुक्तो लो-
काग्रसंस्थितः ॥ ज्ञानाद्यष्टगुणोपेतो निष्कर्मा सिद्ध
संज्ञकः ॥ ११ ॥ अर्हन्निति जगत्पूज्यो जिनः कर्मारि
शासनात् ॥ महादेवोऽधिदेवत्वाच्छङ्करोऽपि सुखावहात् ॥
१२ ॥ विष्णुर्ज्ञानेन सर्वार्थविस्तृतत्वात्कथञ्चन ॥ ब्रह्म-
ब्रह्मज्ञरूपत्वाद्धरिर्दुःखापनोदनात् ॥ १३ ॥ इत्याद्यनेक-
नामाऽपि नानेकोऽस्ति स्वलक्षणात् ॥ यतोऽनन्तगुणा-
त्मैकद्रव्यं स्यात्सिद्धसाधनात् ॥ १४ ॥ चतुर्विंशति-
रित्यादि यावदन्तमनन्तता ॥ तद्बहुत्वं न दोषाय देव-
त्वैकविधत्वतः ॥ १५ ॥ प्रदीपानामनेकत्वं न प्रदीपत्व-
हानये ॥ यतोऽत्रैकविधत्वं स्यान्न स्यान्नानाप्रकारता ॥
१६ ॥ न चाशङ्क्यं यथासंख्यं नामतोऽस्त्वात्मनन्तता
॥ न्यायादेकं गुणं चैकं प्रत्येकं नाम चैककम् ॥ १७ ॥
न यतः सन्ति पुष्पवन्तस्तस्यैव तत्स्वभावात् ॥ अवि-
दृश्य नतो वाच्यं व्यवहारस्य दर्शनात् ॥ १८ ॥ इदं

[illegible] ॥ [illegible] [illegible]-
[illegible] ॥
॥ [illegible] ॥ ११० ॥
[illegible]
॥ [illegible]
[illegible] । [illegible] [illegible]
[illegible] ॥ ११४ ॥ [illegible]
[illegible] ॥ [illegible]
॥ ११ ॥ [illegible] । [illegible]
[illegible] ॥ १४ ॥ [illegible]
किन्तु विंशोऽपि मात्कमवयस्य च ॥ बारकर्माणिना-
भूर्त बन्धमयोदयासवम् ॥ १५ ॥ ममया बन्धमानःप्रिये
स्तद्रूपो मोहबन्धमात् ॥ तन्मत्रं मत्रंबेतन्य योरु पाकः
शमे सयः ॥ १६ ॥ नोर्थं छद्मस्थास्थापशवशेनवाप्नु
तत्सयः ॥ अंतान्मोहक्षयस्यादनन्तैवः परैनः सनः १७
नासिद्धं निर्जरातत्त्वं सदृष्टेः कृत्स्नकर्मणाम्। आरभ्यादे-
द्याभावाद्यथासंख्यगुणं क्रमात् ॥ १८ ॥ ततः कर्मत्रयं
प्रोक्तमस्ति यद्यपि साम्प्रतम् ॥ रागद्वेषाविमोहानामभावा

दुरुना मता ॥ ३९ ॥ यथाऽस्त्येकः स सामान्यात्तद्विशे-
षात्त्रिधा गुरुः ॥ एकोऽप्यग्निर्यथा तार्णं पार्णो दार्व-
स्त्रिधोच्यते ॥ ४० ॥ आचार्यः स्यादुपाध्यायः साधुश्चे-
ति त्रिधा मतः॥ स्युर्विशिष्टपदारूढास्त्रयोऽपि मुनिकुञ्जराः
॥ ४१ ॥ एको हेतु क्रियाऽप्येका वेषश्चैको बहिः समः।
तपो द्वादशधा चैकं व्रतं चैकं च पञ्चधा ॥ ४१ ॥ त्र-
योदशविधं चापि चारित्रं समतैकधा ॥ मूलोत्तरगुणाश्चैके
संयमोऽप्येकधा मतः ॥ ४२ ॥ परीषहोपसर्गाणां
सहनं च समं स्मृतम् ॥ आहारादिविधिश्चैकश्चर्यास्थाना-
सनादयः ॥ ४३ ॥ मार्गो मोक्षस्य सद्दृष्टिर्ज्ञानं चा-
रित्रमात्मनः॥ रत्नत्रयं समं तेषामपि चान्तर्बहिःस्थितम्
॥ ४४ ॥ ध्याता ध्यानं च ध्येयं च ज्ञाता ज्ञानं च ज्ञेयं
स्यात् ॥ चतुर्धाऽऽराधना चापि तुल्या क्रोधादिनिष्णुता
॥ ४५ ॥ किंत्वाऽत्र यद्नोक्तेन तद्विशेषोऽवशिष्यते ॥ त्रि-
शेषाच्छेदनिःशेषो ? न्यायादस्त्यविशेषभाक् ॥ ४६ ॥ आ-
चार्योऽनादितो रूढेर्योगादपि निरुच्यते पञ्चाचारं परेभ्यः
स आचरयति संयमी॥४७॥अपि छिन्ने व्रते साध्वे पुनः
सन्धानमिच्छतः ॥ तत्समादेशदानेन प्रायश्चित्तं प्रयच्छति

[illegible]

[illegible] गाय [illegible] विधा [illegible] प्रा-
देशो नोपदेशो निषेधित ॥ [illegible] पुनाग [illegible]
[illegible]तामपि ॥ ५५ ॥ [illegible]
[illegible]कर्मणि ॥ यत्र [illegible] न [illegible]
॥ ५६ ॥ सहासंयमिभिर्लोके संसर्ग भाषण रतिम् ॥
कुर्यादाचार्य इत्यके नासौ सूरिर्न चाहन ॥ ५७ ॥ सम्य-
क्सम्पोषक. सूरि. प्रोक्त कैश्चिन्मतैरिह ॥ धर्मादेशोपदे-
शाभ्यां नोपकारोऽपरोऽस्त्यतः ॥ ५८ ॥ द्विप मोहातन-

उक्तिपुरःसरम् ॥ साधयत्यात्मसिद्ध्यर्थं साधुरन्वर्थसंज्ञकः
॥ ६९ ॥ नोच्चेदायं यमी किञ्चिद्धस्तपादादिसंज्ञया ॥
न किञ्चिद्दर्शयेत्स्वस्थो मनसाऽपि न चिन्तयेत् ॥ ६७०
आस्ते स शुद्धमात्मानमास्तिघ्नुवानश्च परम् ॥ स्तिमिता-
न्तर्बहिर्जल्पो निस्तरङ्गाब्धिवन्मुनिः ॥ ७१ ॥ नादेशं
नोपदेशं वा नादिशेत्स मनागपि ॥ स्वर्गापवर्गमार्गस्य
तद्विपक्षस्य किं पुनः ॥ ७२ ॥ वैराग्यस्य परां काष्ठाम-
धिरूढोऽधिकप्रभः ॥ दिगम्बरो यथाजातरूपधारी दयापरः
॥ ७३ ॥ निर्ग्रन्थोऽन्तर्बहिर्मोहग्रन्थेरुद्ग्रन्थको यमी ॥
कर्मनिर्जरकः श्रेण्या तपस्वी स तपोंऽशुभिः ॥ ७४ ॥
परीषहोपसर्गाद्यैरजय्यो जितमन्मथः ॥ एषणाशुद्धिसंशुद्धः
प्रत्याख्यानपरायणः ॥ ७५ ॥ इत्याद्यनेकधाऽनेकैः साधुः
साधुगुणैः श्रितः ॥ नमस्यः श्रेयसेऽवश्यं नेतरो विदुषां
महान् ॥ ७६ ॥ एवं मुनित्रयी ख्याता महती महतामपि ॥
तथापि तद्विशेषोऽस्ति क्रमात्तरतमात्मकः ॥ ७७ ॥ तत्रा-
चार्यः प्रसिद्धोऽस्ति दीक्षादेशाद्गुणाग्रणीः ॥ न्यायाद्वा
देशतोऽध्यक्षात्सिद्धः स्वात्मनि तत्परः ॥ ७८ ॥ अर्था-
न्नातत्परोऽप्येष दृङ्मोहानुदयात्सतः ॥ अस्ति येनाविना-

स्त्र प्रमादात् ॥ ८९ ॥ दृष्टयाऽन्वर्गेण पुनः पुनः स्यानुभवो भवेत् । न भवाऽञ्जनकृत् कश्चिदादि परिणतः ॥ ९० ॥ न चारित्रमसंक्लिष्टं चारित्रावरणोदयः ॥ दृष्टयादेश्च कृतं नाशमेति स्वस्य कृतं च यत् ॥ ९१ ॥ कार्यं चारित्रमोहस्य चारित्राच्च्युतिरात्मनः ॥ नात्मदृष्टेस्तु दृष्टित्वान्न्यायादितरदृष्टिवत् ॥ ९२ ॥ यथा पङ्गुः समर्थो वै कर्मानिर्दिष्टयोगतः ॥ इतस्मात्तस्मादपि दृष्टान्तस्तु प्रसिद्धान्तः ॥ ९३ ॥ कषायाणामनुद्रेकश्चारित्रं तावदेव हि ॥ नानुद्रेकः कषायाणां चारित्राच्च्युतिरात्मनः ॥ ९४॥ तत्रात्मैवानुद्रेकः स्यादुद्रेकोऽथवा स्वतः ॥ नात्मदृष्टेः क्षतिर्नूनं दृङ्मोहस्योदयादृते ॥ ९६ ॥ अथ सूरिरुपाध्यायो द्वावेतौ हेतुतः समौ ॥ साधू साधुरिवात्मज्ञौ शुद्धौ शुद्धोपयोगिनौ ॥ ९७ ॥ नापि कश्चिद्विशेषोऽस्ति तयोस्तरतमो मिथः ॥ नैताभ्यामन्तरुत्कर्षः साधोरप्यतिशायनात् ॥ ९८ ॥ लेशतोऽस्ति विशेषश्चेन्मिथस्तेषां बहिःकृतः ॥ का क्षतिर्मूलहेतोः स्यादन्तःशुद्धेः समत्वतः ॥ ९९ ॥ नास्त्यत्र नियतः कश्चिद्युक्तिस्वानुभवागमात् ॥ मन्दादिरुदयस्तेषां सूक्ष्मरागाद्यप-

साधुषु ॥ ७०० ॥ प्रत्येकं बहवः सन्ति सूक्ष्माद्याध्यापता-
धयः ॥ जघन्यमध्यमोत्कृष्टभावैश्चैकैकशः पृथक् ॥ १ ॥
कश्चित्सूरिः कदाचिद्वै विशुद्धिं परमां गतः ॥ मध्यमां
वा जघन्यां वा विशुद्धिं पुनराश्रयेत् ॥ २ ॥ हेतुस्तत्रो-
दिता नाना भावांशैः स्पर्धकाः क्षणम् ॥ धर्मादेशोऽपि
देशादिर्हेतुर्नात्र बहिः क्वचित् ॥ ३ ॥ परिपाट्याऽनया
योज्याः पाठकाः साधवश्च ये ॥ न विशेषो यतस्तेषां
न्यायादन्येपो विशेषभाक् ॥ ४ ॥ नोह्यं धर्मोपदेशादि कर्म
तत्कारणं बहिः ॥ हेतोरभ्यन्तरस्यापि बाह्यं हेतुर्बहिः
क्वचित् ॥ ५ ॥ नैवमर्थाद्यतः सर्वं वस्त्वकिंचित्करं बहिः
॥ तत्पदं फलवन्मोहादिच्छतोऽर्थान्तरं परं ॥ ६ ॥ किं
पुनर्गणिनस्तस्य सर्वतोऽनिच्छतो बहिः ॥ धर्मादेशोप-
देशादि स्वपदं तत्फलं च यत् ॥ ७ ॥ नास्यासिद्धं नि-
रीहत्वं धर्मादेशादिकर्मणि ॥ न्यायादक्षार्थकांक्षाया ईहा
नान्यत्र जातुचित् ॥ ८ ॥ ननु नेहा विनाकर्म कर्म नेहां
विना क्वचित् ॥ तस्मान्नानीहितं कर्म स्यादक्षार्थेषु वा
न वा ॥ ७१० ॥ नैवं हेतोरतिव्याप्तेरारादक्षीणमोहिषु ॥
बन्धस्य नित्यतापत्तेर्भवेन्मुक्तेरसम्भवः ॥ ११ ॥ यतोऽ-

बोधौ क्रिया धर्मानुभावता ॥ तथानुकूलरूपा या मनो-
वृत्तिः सदात्मना ॥ २२ ॥ सा द्विधा सर्वसागारानगारा-
णां विशेषतः ॥ यतः क्रियाविशेषत्वान्नूनं धर्मो विशेषि-
तः ॥ २३ ॥ तत्र हिंसानृतस्तेयाब्रह्मकृत्स्नपरिग्रहात् ॥
देशतो विरतिः प्रोक्तं गृहस्थानामणुव्रतम् ॥ २४ ॥ सर्व-
तो विरतिस्तेषां हिंसादीनां व्रतं महत् ॥ नैतत्सागारिभिः
कर्तुं शक्यते लिङ्गमर्हताम् ॥ २५ ॥ मूलोत्तरगुणाः
सन्ति देशतो वेश्मवर्तिनाम् ॥ तथाऽनगारिणां न स्युः
सर्वतः स्युः परेऽप्यतः ॥ २६ ॥ तत्र मूलगुणाश्चाष्टौ गृहि-
णां व्रतधारिणाम् ॥ क्वचिदव्रतिनां साक्षात्सर्वसाधारणा
इमे ॥ २७ ॥ निसर्गाद्वा कुलाम्नायादायातास्ते गुणाः
स्फुटम् ॥ तद्विनाऽपि व्रतं यावत्सम्यक्त्वं च विनां-
ङ्गिनाम् ॥ २८ ॥ एतावता विनाऽप्येष श्रावको नास्ति
नामतः ॥ किं पुनः पाक्षिको गूढो नैष्ठिकः साधकोऽथवा
॥ २९ ॥ मद्यमांसमधुत्यागी त्यक्तोदुम्बरपञ्चकः ॥
नामतः श्रावकः ख्यातो नान्यथाऽपि तथा गृही ॥ ३० ॥
॥ यथाशक्ति विधातव्यं गृहस्थैर्व्यसनोज्झनम् ॥ अवश्यं
तत्त्वतस्तैरेतैरिच्छद्भिः श्रेयसीं क्रियाम् ॥ ३१ ॥ त्यजे-

दोषींस्तु नत्वोन्हान मन्त्राचामन्त्रकान ॥ अन्यथा मद्यमांसादीन श्रावकः कः समाचरेत् ॥ ३२ ॥ दानं चतुर्विधं देयं पात्रेभ्यश्च श्रद्धया ॥ जघन्यमध्यमोत्कृष्टपात्रेभ्यःश्रावकोत्तमैः ॥ ३३ ॥ कुपात्रायाप्यपात्राय दानं देयं यथोचितम् ॥ पात्रबुद्ध्या निषिद्धं स्यान्निषिद्धं न कृपाधिया ॥ ३४ ॥ शेषेभ्यः क्षुत्पिपासादिपीडितेभ्योऽशुभोदयात् । दीनेभ्योऽभयदानादि दातव्यं करुणार्णवैः ॥ ३५ ॥ पूजामप्यर्हतां कुर्याद्वा प्रतिमासु तद्धिया ॥ स्वरव्यञ्जनानि संस्थाप्य सिद्धानप्यर्चयेत् सुधीः ॥ ३६ ॥ सूर्युपाध्यायसाधूनां पुरस्तात्पादयोः स्तुतिम् ॥ प्राग्विधायाष्टधा पूजां विदध्यात्स त्रिशुद्धितः ॥ ३७ ॥ सम्मानादि यथाशक्ति कर्तव्यं च सधर्मिणाम् ॥ व्रतिनां चेतरेषां वा विशेषाद्ब्रह्मचारिणाम् ॥ ३८ ॥ नारीभ्योऽपि व्रताढ्याभ्यो न निषिद्धं जिनागमे ॥ ३९ ॥ सम्मानदानादि लोकानामविरुद्धतः ॥ ४० ॥ जिनचैत्यगृहादीनां निर्माणे सावधानता ॥ यथासम्पद्विधातव्या द्रव्यात्सावद्यलेशतः ॥ ७४० ॥ सिद्धान्ताहच्चारित्रशास्त्राणि धनिना शुभाः चैत्यालयेषु संस्थाप्य पाठनीयान्यनुव्रतैः ॥ ४१ ॥

अपि तीर्थादियात्रासु विदध्यात्सोद्यमं मनः ॥ श्रावकः स
च सदापि संयमं न विराधयेत् ॥ ४२ ॥ निरये नैरयिकि-
के चैव मिश्रविभ्रमहारमवे ॥ देविकल्पं नैव कर्तव्यं
तत्त्वज्ञैस्तद्विशेषतः ॥ ४३ ॥ संयमो द्विविधश्चैव विवेको
गृहमेधिभिः ॥ विनाऽपि मनिवाक्यं यतो यद्वा स्वशक्तितः
॥ ४४ ॥ तपो द्वादशधा द्वेधा बाह्याभ्यन्तरभेदतः ॥
कृत्स्नमन्यतमं वा तत्कार्यं चानतिवीर्यसात् ॥ ४५ ॥ वर्के
दिव्यानमनोऽप्यत्र मनःकाष्ठा गृहिव्रतम् ॥ चतुर्थे चोपास-
काध्यायोक्तसामायिकत्रयविस्तरम् ॥ ४६ ॥ पञ्चमेऽष्टमूलगुणा-
श्च द्वादशविधप्रकृतिश्रावकयोः ॥ आचारात्पञ्चधावेनोक्ता नातिरि-
क्ता कदाचन ॥ ४७ ॥ सर्वैरपि समस्तैश्च सिद्धं यावन्मु-
निव्रतम् ॥ च व्यस्तैश्चैकदेशाख्यं तु यावद्दर्शनवादपि
॥४८॥ वर्ज्यं च—चरमसिद्धिहिंसादोषो बोधो आवश्यकव-
चेलपरिग्रहम् ॥ स्थितिभोजनमेकं दन्तधावनमेव-
भुक्तं च ॥ ४९ ॥ एते मूलगुणाः प्रोक्ता यतीनां जैनशा-
सने ॥ श्रावकाणां चतुर्दशीनिर्गुणाश्चोत्तरमलदाः ॥ ५० ॥
ततः सागारधर्मो वाऽनगारो वा यथोदितः ॥ प्राणिसंर-
क्षणं मूलगुणप्रवर्तनविशेषतः ॥ ५१ ॥ रत्नत्रयविधि क्रियान्ते

स्यादाराधनकत्स्थकम् ॥ सर्वसावद्ययोगस्य तदेकस्य निवृत्तये ॥ ५१ ॥ यथा लीनोऽस्ति संज्ञोऽयमन्त्यादेतः ॥ ५२ ॥ सर्वसावद्ययोगस्य निवृत्तिर्व्रतमुच्यते ॥ ५३ ॥ सर्वदेशेन तथान्तर्बहिर्विनिदर्शनः ॥ प्राणच्छेदो हि सावद्यं सैव हिंसा प्रकीर्तिता ॥ ५४ ॥ योगस्त्रयोपयोगो वा बुद्धिपूर्वः स उच्यते ॥ सूक्ष्मश्चाबुद्धिपूर्वो यः स स्मृतो योग इत्यपि ॥ ५५ ॥ तत्रासावानिवृत्तिः स्यादयतं वाऽप्यविरति स्मृतिः ॥ अंशात्साऽप्यंशतस्तस्मात् सर्वतः सर्वतोऽपि तत् ॥ ५६ ॥ सर्वतः सिद्धमेवैतद्व्रतं बाह्यं दयाङ्गिषु ॥ व्रतमन्तः कषायाणां त्यागः सैवात्मनि कृपा ॥ ५७ ॥ लोकासंख्यातमात्रास्ते यावद्रागादयः स्फुटम् हिंसा स्यात्संविदादीनां धर्माणां हिंसनाच्चितः ॥ ५८ ॥ अर्थाद्रागादयो हिंसा चास्त्यधर्मो व्रतच्युतिः ॥ अहिंसा तत्परित्यागो व्रतं धर्मोऽथवा किल ॥ ५९ ॥ आत्मेतराङ्गिणामङ्गरक्षणं यन्मतं स्मृतम् ॥ तत्परं स्वात्मरक्षायाः कृतं नातः परं च यत् ॥ ७६० ॥ सत्सु रागादिभावेषु बन्धः स्यात्कर्मणां बलात् ॥ तत्पाकादात्मनो दुःखं तत्सिद्धः स्वात्मनो वधः ॥ ६१ ॥ ततः शुद्धोपयोगो यो मोहकर्मोदयादृते ॥ चारित्रापरनामैतद्व्रतं निश्चयतः परम् ॥ ६२ ॥ चारित्रं निर्जराहेतुर्न्यायादप्यस्त्यबाधितम् ॥

सर्वस्वार्थक्रियामर्हन् सार्थनामास्ति दीपवत् ॥ ६३ ॥ रूढेः शुभोपयोगोऽपि ख्यातश्चारित्रसंज्ञया ॥ स्वार्थक्रियामकुर्वाणः सार्थनामा न निश्चयात् ॥ ६४ ॥ किन्तु बन्धस्य हेतुः स्यादर्थात्तत्प्रत्यनीकवत् ॥ नासौ वरं वरं यः स नापकारोपकारकृत् ॥ ६५ ॥ विरुद्धकार्यकारित्वं नास्यासिद्धं विचारसात् ॥ बन्धस्यैकान्ततो हेतोः शुद्धादन्यत्र सम्भवात् ॥ ६६ ॥ नोह्यं प्रज्ञापराधत्वा-न्निर्जराहेतुरंशतः ॥ अस्ति नाबन्धहेतुर्वा शुभो नाप्यशु-भावहात् ॥ ६७ ॥ कर्मादानक्रियारोधः स्वरूपाचरणं च यत् ॥ धर्मः शुद्धोपयोगः स्यात्सैष चारित्रसंज्ञकः ॥ ६८ ॥ उक्तं च– चारित्तं खलु धम्मो धम्मो जो सो समो-त्तिणिद्दिट्ठो ॥ मोहक्खोहविहीणो परिणामो अप्पणो धम्मो ॥ ६९ ॥ ननु सद्दर्शनज्ञानचारित्रैर्मोक्षपद्धतिः ॥ समस्तैरेव न व्यस्तैस्तत्किं चारित्रमात्रया ॥ ७७० ॥ सत्यं सद्दर्शनं ज्ञानं चारित्रान्तर्गतं मिथः ॥ त्रयाणामवि-नाभावादिदं त्रयमखण्डितम् ॥ ७१ ॥ किञ्च सद्दर्शनं हेतुः संविच्चारित्रयोर्द्वयोः ॥ सम्यग्विशेषणस्योच्चैर्यद्वा प्रत्यग्र-जन्मनः ॥ ७२ ॥ अथोऽयं सति सम्यक्त्वे ज्ञानं चारि-

श्चमत्र यत् ॥ भूतपूर्वं भवेत्सम्यक् सूते वा भूतपूर्वकत् ॥ ७३ ॥ शुद्धोपलब्धिशक्तिर्या लब्धिज्ञानातिशायिनी ॥ सा भवेत्सति सम्यक्त्वे शुद्धो भावोऽथवाऽपि न ॥७४॥ यत्पुनर्द्रव्यचारित्रश्रुतं ज्ञानं विनाऽपि दृक् ॥ न तज्ज्ञानं न चारित्रमस्ति चेत्कर्मबन्धकृत् ॥ ७५ ॥ तेषामन्यतमोद्देशो नाल्पो दोषाय कुत्रचित् ॥ मोक्षमार्गैकसाध्यस्य साधकानां स्मृतेरपि ॥ ७६ ॥ बन्धो मोक्षश्च ज्ञातव्यः समासात्प्रश्नकोविदैः ॥ रागांशैर्बन्ध एव स्यान्नारागांशैः कदाचन ॥ ७७ ॥ उक्तं च– येनांशेन सुदृष्टिस्तेनांशेनास्य बन्धनं नास्ति ॥ येनांशेन तु रागस्तेनांशेनास्य बन्धनं भवति ॥ ७८ ॥ उक्तो धर्मः स्वरूपोऽपि प्रसङ्गात्सङ्गतोऽद्यतः ॥ कविर्लब्धावकाशस्तं विस्तराद्वा करिष्यति ॥ ७९ ॥ देवे गुरौ तथा धर्मे दृष्टिस्तत्त्वार्थदर्शिनी ॥ ख्याताऽप्यमूढदृष्टिः स्यादन्यथा मूढदृष्टिता ॥ ७८० ॥ सम्यक्त्वस्य गुणोऽप्येष नालं दोषाय लक्षितः ॥ सम्यग्दृष्टिर्यतोऽवश्यं तथा स्यान्न तथेतरः ॥ ८१ ॥ उपबृंहणनामास्ति गुणः सम्यग्दगात्मनः ॥ लक्षणादात्मशक्तीनामवश्यं बृंहणादिह ॥ ८२ ॥ आत्मशुद्धेरदौर्बल्यकरणं

योपबृंहणम् ॥ अर्थाद्दृङ्मोहचारित्रभावात्संवलितं हि तत् ॥ ८३ ॥ ज्ञानमप्येष निःशेषात्स्थैर्यं मेरुमिव ॥ तथापि यत्नवानत्र धीरत्वं मेरुमिव ॥ ८४ ॥ अर्थ शुद्धोपलब्धौ स्यात्प्रमत्तोऽपि प्रमादवान् ॥ नित्यमादतयाऽऽत्मानमाददानः सदादरात् ॥ ८५ ॥ यदा शुद्धोपलब्ध्यर्थमभ्यस्येदपि तद्विः ॥ सातिशया वाञ्छिब-दप्यथीवस्ताध्यानुपयोगिनीम् ॥ ८६ ॥ रतीन्द्र सेवमानोऽपि कोऽपि यथ्यं न चाऽऽचरेत् ॥ आत्म-नोऽनुग्रहपरात्पुरस्योऽप्यनुग्राहकतापि ॥ ८७ ॥ यद्वा सिद्धं विनाऽऽपाततारपतस्तथोपबृंहणम् ॥ ऊर्ध्वमू-र्ध्वगुणश्रेण्यां निर्जरायाः प्रसम्भवात् ॥ ८८ ॥ अवश्यं भाविनी चात्र निर्जरा कर्मवर्जनात् ॥ यतिमुख्यस्तनं यावदसंख्येयगुणक्रमात् ॥ ८९ ॥ न्यायादायाद्यदेवेद् या-वतांशेन तत्सतिः ॥ वृद्धिः शुद्धोपयोगस्य स्यादेवृद्धिः पुनः पुन. ॥ ९० ॥ यथा यथा विशुद्धेः स्याद्वृद्धि-रन्तःप्रकाशिनी ॥ तथा तथा हृषीकाणामुपेक्षा विषयेष्वपि ॥ ९१ ॥ ततो भूम्नि विषयारम्भे चारित्रं ॥ लोपयेत् ॥ किन्तु संवर्धयेन्नूनं प्रयत्नादपि दृढिमान् ॥ ९२ ॥

उपबृंहणनामाऽपि गुणः सद्दर्शनस्य यः ॥ गणितो गणनामध्ये गुणानां नागुणाय च ॥ ९३ ॥ सुस्थितीकरणं नाम गुणः सम्यग्दृगात्मनः ॥ धर्माच्च्युतस्य धर्मे तं नाधर्मेऽधर्मणः क्षतेः ॥ ९४ ॥ न प्रमाणीकृतं वृद्धैर्धर्मायाधर्मसेवनम् ॥ मा विधर्मा यथा केचिन्मन्दाः सावद्यवादिनः ॥ ९५ ॥ परम्परेति पक्षस्य नाऽवकाशोऽत्र लेशतः ॥ मूर्खादन्यत्र नो मोहाच्छीतार्थं वह्निमाविशेत् ॥ ९६ ॥ नैतद्धर्मस्य प्राग्रूपं प्रागधर्मस्य सेवनम् ॥ व्याप्तेरपक्षधर्मत्वाद्धेतोर्वा व्यभिचारतः ॥ ९७ ॥ प्रतिसूक्ष्मक्षणं यावद्धेतोः कर्मोदयात्स्वतः ॥ धर्मो वा स्यादधर्मो वाऽप्येष सर्वत्र निश्चयः ॥ ९८ ॥ सुस्थितीकरणं द्वेधाऽप्यत्र स्वापरभेदतः ॥ स्वात्मनः स्वात्मतत्त्वेऽर्थात्परात्परे तु परस्य तत् ॥ ९९ ॥ तत्र मोहोदयोद्रेकाच्च्युतस्यात्मविधेरिव ॥ भूयः संस्थापनं स्वस्य स्थितीकरणमात्मनि ॥ ८०० ॥ अयं भावः कचिद्दैवाद्दर्शनात्म पतत्यतः ॥ प्रमत्पूर्वं पुनर्दैवात्सम्यगा-स्य दर्शनम् ॥ १ ॥ अथ कश्चिद्यथा हेतुर्दर्शनादच्युतस्त्वपि ॥ भावशुद्धिमयोऽस्योऽशैरूर्ध्वपूर्वं प्रयाति ॥ २ ॥ क-

मिथ्यादृष्टिः शुभाचारं स्वीकृत्य यापि मुञ्चति ॥ न मुञ्चति कदाचिद्वै दृश्यत्वा वा पुनराश्रयेत् ॥ ३ ॥ यदा बहिः क्रियाचारे यथावस्थे स्थितेऽपि च ॥ कदाचिद्दोषपाप्म-कोऽन्यधर्मैर्विधूत्वा च वर्तते ॥ ४ ॥ नासम्भवमिदं य-स्मात्पारिणामावरणोदयः ॥ अस्ति तरतमत्वांशैर्गच्छामि-म्नीभ्रमतामिह ॥ ५ ॥ अथाभिप्रेतमेवैतत्स्वस्थितीकरणं स्वतः ॥ न्यायात्कुतश्चिदभ्यास्ति हेतुस्तत्रानवस्थितिः ॥ ६ ॥ सुस्थितीकरणं नाम परेषां सदनुग्रहात् ॥ भ्रष्टानां स्वपदात्तत्र स्थापनं तत्पदे पुनः ॥ ७ ॥ धर्मादेशोपदे-शाभ्यां कर्तव्योऽनुग्रहः परे ॥ नात्मवृत्तं विहायास्तु तत्परः पररक्षणे ॥ ८ ॥ उक्तं च ॥ आदहिदं कादव्वं जइ सकइ परहिदं च कादव्वम् ॥ आदहिदपरहिदादो आदहिदं सुट्ठुकादव्वम् ॥ ९ ॥ उक्तो दिङ्मात्रतोऽप्यत्र सुस्थितीकरणं गुणः ॥ निर्जरायां गुणश्रेणौ प्रसिद्धः सुदृगात्मनः ॥ १० ॥ वात्सल्यं नाम दासत्वं सिद्धार्हद्बि-म्बवेश्मसु ॥ संघे चतुर्विधे शास्त्रे स्वामिकार्ये सुभृत्यवत् ११ अर्थादन्यतमस्योच्चैरुद्दिष्टेषु स दृष्टिमान् ॥ सत्सु-घोरोपसर्गेषु तत्परः स्यात्तदत्यये ॥ १२ ॥ यद्वा

न ह्यात्मसामर्थ्यं यावन्नव्यासिक्तोऽवकम् ॥ तावद्द्रष्टुं
च श्रोतुं च तद्वार्तां सहते न सः १३ तद्विवाऽथ च वा-
त्सल्यं भेदात्स्वपरगोचरात् ॥ प्रधानं स्वात्मसंबन्धिगुणो
यावत्परात्मनि १४ परीषहोपसर्गाद्यैः पीडितस्यापि
कुत्रचित् ॥ न शैथिल्यं शुभाचारे ज्ञाने ध्याने तदादिमम्
इतरत्साम्यमिह स्थानं गुणो दृष्टिमतः स्फुटम् ॥ शुद्धदर्श-
नपक्षादेव यतो बाधापकर्षणम् १६ प्रभावनाङ्गसंज्ञोऽस्ति
गुणः सद्दर्शनस्य वै ॥ उत्कर्षकरणं नाम लक्षणादपि
लक्षितम् १७ अथातद्धर्मणः पक्षे नावद्यस्य मनागपि
॥ धर्मपक्षक्षतिर्यस्मादधर्मोत्कर्षपोषणात् १८ पूर्ववत्सोऽ-
पि द्विविधः स्वान्यात्मभेदतः पुनः ॥ तत्राद्यो वरमा-
देयः स्यादादेयः परोऽप्यतः १९ उत्कर्षो यत्तथापि-
वपादपिकीकरणं हृदे ॥ अमत्सु मलनीकेषु नाल्पं
दोषाय तत्क्वचित् ८२० मोहारातिक्षतेः शुद्धः शुद्धाच्छु-
द्धतरस्ततः ॥ जीवः शुद्धतमः कश्चिदस्तीत्यात्मप्रभावना
२१ नेदं स्यात्पौरुषापेक्षं किन्तु नूनं स्वभावतः ॥
ऊर्ध्वमूर्ध्वं गुणश्रेणौ यतः सिद्धिर्यथागमम् २२ बाह्यः
प्रभावनाङ्गोऽस्ति विद्यामन्त्रादिभिर्बलैः । तपोदानादिभि-

जैनधर्मोन्नतौ विधीयताम् ॥ २३ ॥ येषामपकर्षोऽपि मि-
थ्यात्वोत्कर्षशालिनाम् ॥ चमत्कारकरं किञ्चिद्विधेयं
महात्मभिः ॥ २४ ॥ उक्तःप्रभावनाख्योऽपि गुणः सद्दर्शना-
न्वितः ॥ येन सम्पूर्णतां याति दर्शनस्य गुणाष्टकम् ॥
२५ ॥ इत्यादयो गुणाश्चान्ये विद्यन्ते सद्गात्मनः ॥
अलं चिन्तनया तेषामुच्यते यद्विवक्षितम् ॥ २६ ॥
प्रकृतं तद्यथाऽस्ति स्वं स्वरूपं चेतनाऽऽत्मनः ॥ सा
त्रिधाऽत्राप्युपादेया सद्दृष्टेर्ज्ञानचेतना ॥ २७ ॥ श्रद्धानादि-
गुणाश्चैते बाह्योल्लेखच्छलादिह ॥ अर्थात्सद्दर्शनस्यैकं लक्षणं
ज्ञानचेतना ॥ २८ ॥ ननु रूढिरिहाप्यस्ति योगाद्वा लो-
कतोऽथवा ॥ तत्सम्यक्त्वं द्विधाऽप्यर्थान्निश्चयाद्व्यवहारतः
॥ २९ ॥ व्यावहारिकसम्यक्त्वं सरागं सविकल्पकम् ॥
निश्चयं वीतरागं तु सम्यक्त्वं निर्विकल्पकम् ॥ ८३० ॥
इत्यस्ति वासनोन्मेषः केषाञ्चिन्मोहशालिनाम् ॥ तन्मते
वीतरागस्य सद्दृष्टेर्ज्ञानचेतना ॥ ३१ ॥ तैः सम्यक्त्वं
द्विधा कृत्वा स्वामिभेदो द्विधा कृतः ॥ एकः कश्चित्सरा-
गोऽस्ति वीतरागश्च कश्चन ॥ ३२ ॥ तत्रास्ति वीतरा-
गस्य कस्यचिज्ज्ञानचेतना ॥ सद्दृष्टेर्निर्विकल्पस्य नेतरस्य .

कराधन ॥ ३३ ॥ कषायरहितध्यानैः सविरागस्य गामिनः ॥ मनीनिषामर्थपरानिव दूरः स्यात् ज्ञानेनाद्य ॥ ३४ ॥ इति मयान्यानेन ये वदन्ति दुरागताः ॥ तेषां पारम्पर्यागमाभावः कार्यकारण केवलम् ॥ ३५ ॥ अभीरवने गमापानं मापवादेन गृहिभिः ॥ तथैक्यह-गिरौ तुरीये योऽयं जन्ममनादिवम् ॥ ३६ ॥ मनुष्यात्म-वदाहितं करीर कुम्ने कुहरू ॥ ततोऽपि सदीह तं फल मात्र विविक्ताम् ॥ ३७ ॥ यन्दर्गाण्यवपिरान्मत्र पृथक्तु त्वमदीय ॥ मा विभ्रमस्व इप । अपि वस्तुनाऽन्या-श्रुताशया ॥ ३८ ॥ विकल्पो योगसंक्रान्तिरर्थज्ञानस्य पर्ययः ॥ ज्ञेयाकारः स ज्ञेयार्थात् ज्ञेयार्थान्तरसङ्गतः ३९ क्षायोपशमिके तस्यादर्थादर्थान्तरसम्भवम् ॥ क्षायिकात्य-क्षज्ञानस्य संक्रान्तेरप्यसम्भवात् ॥ ४० ॥ अस्ति क्षायिकज्ञानस्य विकल्पत्वं स्वलक्षणात् ॥ नार्थादर्थान्तरा-कारयोगसंक्रान्तिलक्षणात् ॥ ४१ ॥ तल्लक्षणं स्वापूर्वार्थ-विशेषग्रहणात्मकम् ॥ एकोऽर्थो ग्रहणं तत्स्यादाकारः सविकल्पता ॥ ४२ ॥ विकल्पः सोऽधिकारेऽस्मिन्नाधि-कारी मनागपि ॥ योगसंक्रान्तिरूपो यो विकल्पोऽधि-

क्षणोऽप्यनु ॥ ४३ ॥ ऐन्द्रियं तु पुनर्ज्ञानं न संक्रान्तिमृते क्वचित् ॥ यतोऽस्यास्य क्षणं यावदर्थादर्थान्तरे गतिः ४४ इदं तु क्रमवर्त्यस्ति न स्यादक्रमवर्ति यत् ॥ एकां व्यक्तिं परित्यज्य पुनर्व्यक्तिं समाश्रयेत् ॥ ४५ ॥ इदं त्वावश्यकी वृत्तिः समव्याप्तेरिवाद्वया ॥ इयं तथैव नान्यत्र तथैवेयं न चेतरा ॥ ४६ ॥ यत्पुनर्ज्ञानमेकत्र नैरन्तर्येण कुत्रचित् ॥ अस्ति तद्ध्यानमत्रापि क्रमो नाप्यक्रमोऽर्थतः ॥ ४७ ॥ एकरूपमिवाभाति ज्ञानं ध्यानैकतानतः ॥ तत्स्यात्पुनः पुनर्वृत्तिरूपं स्यात्क्रमवर्ति च ॥ ४८ ॥ नात्र हेतुः परं साध्ये क्रमत्वेऽर्थान्तराकृतिः ॥ किन्तु तत्रैव चैकार्थे पुनर्वृत्तिरपि क्रमात् ॥ ४९ ॥ नोह्यं तत्राप्यतिव्याप्तिः क्षायिकात्यक्षसंविदि ॥ स्यात्परीणामवत्त्वेऽपि पुनर्वृत्तेरसम्भवात् ॥ ८५० ॥ यावदेकसमयमीयानाप्यस्ति ज्ञानमनुक्रमम् ॥ नियतक्रमवर्तित्वात्सर्वं संक्रमणात्मकम् ॥ ५१ ॥ नालं दोषाय तच्छक्तिः सूक्तसंक्रान्तिलक्षणा ॥ हेतोर्नैमित्तिकत्वेऽपि शक्तिरात्मज्ञानशक्तिवत् ॥ ५२ ॥ ज्ञानसञ्चेतनायास्तु न स्यात्तद्विघ्नकारणम् ॥ तत्स्वरूपस्य स्वैवेति तद्विरुद्धो न तद्विधुः ॥

पकर्षणम् ॥ ७३ ॥ उत्पत्तिः पापबन्धस्य स्यादुत्क- र्षोऽपचयोऽस्य च ॥ तद्धयस्यापरा किञ्चिद्धावद्वेद- नादिकम् ॥ ७४ ॥

गुणः सम्यक्त्वसम्भूतिरुत्कर्षो वा सतोऽशकैः ॥ निर्जराऽ- भिनवा यद्वा संवरोऽभिनवो मनाक् ॥ ७५ ॥ उत्कर्षो वाऽनयोरंशैर्द्वयोरन्यतरस्य वा ॥ श्रेयोबन्धोऽशुभोत्कर्षो यद्वा स्यादपकर्षणम् ॥ ७६ ॥ गुणद्वोपद्वयोरत्र योगवा- गोऽस्ति कारणम् ॥ हेतुर्नान्यतरस्यापि योगवाही न नाश्यवम् ॥७७॥ सम्यक्त्वं जीवभावः स्या[illegible] दर्शनमः ॥ अस्ति तेनाविनाभूतव्यापः [illegible] ॥ ७८ ॥ दर्शनमोहेगते तत्र सम्यक्त्वं स्यादनन्तरम् ॥ [illegible] योगवाही च नाश्यवम् ॥ ७९ ॥ [illegible] स्याद्याक्रियेो[illegible] ॥ [illegible] [illegible] सति स्याथ: ॥ ८८० ॥ [illegible] [illegible] येऽपि [illegible] ॥ [illegible] [illegible] ८१ ॥ [illegible] [illegible] भाव[illegible] [illegible]ोऽपि [illegible] नोपयोगि

स्वस्वैवोपयोग्यस्तु ज्ञानं स्यात्परात्मनि ॥ तत्तु·
सम्यक्त्वभावेषु सन्ति ते निर्जरादयः ॥ ८३ ॥ यत्पुनः
श्रेयसो बन्धो बन्धश्चाश्रेयसोऽपि वा ॥ रागाद्वा द्वेषतो मो·
हात्स स्यान्नोपयोगसात् ॥ ८४ व्याप्तिर्बन्धस्य रा·
गाद्यैर्नाव्याप्तिर्विकल्पैरिव ॥ विकल्पैरस्य चाव्याप्तिर्
व्याप्तिः किन्तु तैरिव ॥ ८५ नानेकत्वमसिद्धं स्यादस्त्या·
व्याप्तिर्मिथोऽनयोः ॥ रागादेश्चोपयोगस्य किन्तु साऽस्ति त
द्द्वयोः ॥ ८६ ॥ व्याप्तत्वं तथ रागादिर्भावबद्धादिते
यत. ॥ पाकक्रमादिमयोरस्य हृद्योरस्याथ नान्यथा ॥ ८७ ॥
क्षायोपशमिकं ज्ञानमुपयोगः स उच्यते ॥ एतद्वाव·
रणस्योर्ध्वैः समाहोपशमान्वतः ॥ ८८ ॥ अस्ति स्व·
हेतुको रागो ज्ञानं चास्ति स्वहेतुकम् ॥ दूरे स्वरू·
पभेदत्वादेकार्थत्वं कुतोऽनयोः ॥ ८९ ॥ सिद्ध·
ज्ञानं भवत्येव भवतीदं न चापरम् ॥ रागादयो भ·
वन्तश्च भवन्त्येव न चिद्यथा ॥ ९० ॥ अभिज्ञा·
मे च यथास्ति सर्वथाने चिति स्फुटम् ॥ रागादी·
नामभिव्यक्तिर्न स्याच्छक्तेरसम्भवात् ॥ ९१ ॥ सर्वत्र
वेषु देवेषु बुद्धिज्ञानस्य न क्वचित् ॥ अस्ति यत्र

स्वसामग्र्यां सत्यां वृद्धिः समा द्वयोः ॥ ९२ ॥
ज्ञानेऽत्र वर्धमानेऽपि हेतोः प्रतिपक्षक्षयात् ॥ रागादी-
नां न हानिः स्याद्धेतोर्मोहोदयात्मनः ॥ ९३ ॥ यद्वा
दैवात्स्वसामग्र्यां सत्यां हानिः समं द्वयोः ॥ आ-
त्मीयाऽऽत्मीयहेत्वोर्वा ज्ञेया नान्योन्यहेतुतः ॥ ९४ ॥
व्याप्तिर्वा नोपयोगस्य द्रव्यमोहेन कर्मणा ॥ रागादीनां
तु व्याप्तिः स्यात्संविदावरणैः सह ॥ ९५ ॥ अन्वय-
व्यतिरेकाभ्यामेषा व्याप्तिर्नैव तु ॥ न स्यात्क्रमात्तथा
व्याप्तिर्हेतोरन्यतरादपि ॥ ९६ ॥ व्याप्तेरसिद्धिः सा-
ध्याऽत्र साधनं व्यभिचारिणा ॥ सैकाश्रयमपि सत्यन्यो
न स्यात्स्याद्वा स्वहेतुतः ॥ ९७ ॥ व्याप्तित्वं साहचर्यस्य
नियमः स यथा मिथः ॥ सति यत्र यः स्यादेव न स्या-
देवासतीह यः ॥ ९८ ॥ यावद्रागसद्भावे नूनं बन्धस्य
सम्भवात् ॥ रागादीनामसद्भावे बन्धस्यासम्भवादपि ॥
९९ ॥ व्याप्तिः सा विषमा सत्सु संविदावरणादिषु ॥
अभावाद्रागभावस्य भावाद्वाऽस्य स्वहेतुतः ॥ १०० ॥
अव्याप्तिश्चोपयोगेऽपि विद्यमानेऽष्टकर्मणाम् ॥ बन्धो नास्य-
दनस्यापि भावनत्रयात्मनि ॥ १ ॥ यद्वा स्यात्पोर-

योगात् कोऽयमानुपयोगवान् ॥ व्यतिरेकावकाशेऽपि नार्था-
द्यास्ति वस्तुनः ॥ २ ॥ सर्वतमोपसंहारः सिद्धैता-
नात्र वै ॥ हेतुः स्यादोपयोगोऽयं दृष्टो वा चन्द्रयोःसयोः
॥ ३ ॥ ननु चैवं स प्रत्यायो यः पूर्वं प्रकृतो यथा ॥
कल्पयिद्वीतरागस्य सद्देष्टानचेतना ॥ ४ ॥ आत्म-
नोऽन्यत्र क्वापि स्थिते ज्ञाने परात्मवत् ॥ ज्ञानसञ्चेतनाय
स्यात्क्षतिः साधीयसी तदा ॥ ५ ॥ सत्यं चापि
सर्वेरस्याः क्षतिः साध्यस्य न काचित् ॥ इयानात्मोप-
योगस्य सत्यात्मन्यात्महेतुनः ॥ ६ ॥ साध्यं यद्दर्शना-
द्धेतोर्निर्जरा चाष्टकर्मणाम् ॥ स्वतो हेतुवशाच्छक्तेर्न
तद्धेतुः स्वचेतना ॥ ७ ॥ ननु चेदाश्रयासिद्धो विकल्पो
व्योमपुष्पवत् ॥ तत्किं हेतुः प्रसिद्धोऽस्ति सिद्धः सर्ववि-
दागमात् ॥ ८ ॥ सत्यं विकल्पसर्वस्वसारं ज्ञानं स्वल-
क्षणात् ॥ सम्यगरेव यद्विकल्पत्वं न तदिसप्तं परीक्षणात्
॥ ९ ॥ यत्पुनः कैश्चिदुक्तं स्यात्स्थूललक्ष्योऽनुपलेरिह ॥
अमेत्यचारहेतुर्यत्वं ज्ञो किल साम्प्रतम् ॥ १० ॥
क्षायोपशमिकं ज्ञानं प्रत्यर्थं परिणामि यत् ॥ तत्स्वरूपं
न ज्ञानस्य किन्तु रागक्रियाऽस्ति वै ॥ ११ ॥ प्रत्यर्थ-

परिणामिन्यपर्यानामेतदस्ति यत्र ॥ अर्थमर्थ
पुथग्द्रव्यपदाद्विपच्यथा ॥ १२ ॥ स्वसंवे . . .
मिदं यतः ॥ रागाक्तं ज्ञानमशान्ति रागिणो
मुनेः ॥ १३ ॥ अस्ति ज्ञानाविनाभूतो रागो
स्सर ॥ अज्ञानेऽर्थे यतो न स्याद्रागभावः स्व
१४ ॥ अस्त्युक्तलक्षणो ...
अप्रमत्तगुणस्थानाद्र्वाक स्यात्सोऽर्ध्वमस्त्यसौ ॥
अस्ति चोर्ध्वमसौ सूक्ष्मो रागश्चाबुद्धिपूर्वजः ॥
क्षीणकषायेभ्यः स्याद्विवक्षावशाच्च वा ॥ १६ ॥
इयैतत्परं केचिदसद्भूतोपचारतः ॥ ...
सम्यक्त्वं तदुदीरितम् ॥ १७ ॥ हेतोः परः प्र-
स्थूलक्षेरिति स्मृतम् ॥ अप्रमत्ते च सम्यक्त्वं
वा सविकल्पकम् ॥ १८ ॥ ततस्तूर्ध्वं तु सम्यक्त्वं
वा निर्विकल्पकम् ॥ शुद्धज्ञाने तदेवास्ति
ज्ञानचेतना ॥ १९ ॥ प्रमत्तानां विकल्पत्वान्न
शुद्धचेतना ॥ अस्तीति वासनोन्मेषः ...
सन्निह ॥ २० ॥ यतः पराश्रितो दोषो गुणो वा
मेतरम् ॥ परो वा नाश्रयेदोषं गुणं चापि

र्थवात् ॥ ३१ ॥ अथ सम्यक्त्वसद्दोषः स्यात्सिद्धं विसं-
शकः ॥ दोषः स्यादनवस्थाख्यो दुर्वारोऽन्योन्यसंश्रयः
॥ ३२ ॥ दृङ्मोहस्योदयो नाम रागायत्तोऽस्ति चेन्मतम्
॥ सोऽपि रागोऽस्ति स्वायत्तः किं स्यादपररागमात्॥
स्वायत्तश्चेव चारित्रस्य मोहस्योदयात्स्वतः ॥ यथा राग-
स्तथा चायं स्वायत्तः स्वोदयात्स्वतः ॥ ३४ ॥ अथ
चेत्तद्द्वयोरेव मिथ्यान्योन्यहेतुः ॥ स्यादसिद्धदोषः
स्यादात्माश्रयोऽन्योन्यसंश्रयात् ॥ ३५ ॥ नायं कश्चिदस्ती
दर्शनदृङ्मोहकर्मणः ॥ हेतुस्तस्यापि रागस्य तस्य हेतुर्दृगा-
वृतिः ॥ ३६ ॥ तस्मात्सिद्धोऽस्ति सिद्धान्तो दृङ्मोहस्ये-
तरस्य वा ॥ उदयोऽनुदयो वाऽथ स्यादनन्यगतिः स्वतः
३७ ॥ तस्मात्सम्यक्त्वमस्त्येकं स्याद्यथोपशमादपि ॥ यथा-
ऽस्वरूपकी तत्र विद्यते ज्ञानचेतना ॥ ३८ ॥ मिथ्योपशमपिंडं
नाम स्तापिंडं चेति सन्निवा ॥ स्थितिबन्धकृतो भेदो न
भेदो रसबन्धमात् ॥ ३९ ॥ तथापाऽथ चतुर्भेदो बन्धोऽ-
नादिप्रभेदतः ॥ प्रकृतिश्च प्रदेशाख्यो बन्धो स्थित्यनु-
भागकौ ॥ ९४० ॥ प्रकृतिस्तत्स्वभावत्वात्प्रदेशो देश-
संश्रयः ॥ अनुभागो रसो ज्ञेयः स्थितिः कालावधारणम् ॥

४१ ॥ स्वार्थः क्रियासमर्थोऽत्र बन्धः स्यादूतसन्निभकः ॥
क्षेत्रवन्धविकोऽप्येष न कार्यकारणक्षमः ॥ ४२ ॥ ततः
स्थितिवशादेव सम्यावेऽप्यत्र संस्थिते ॥ ज्ञानतश्चैत-
नायाम्तु स्तिर्न स्याज्जनागपि ॥ ४३ ॥ एवमित्यादय-
मान्ये सन्ति ये सद्गुणोपमाः ॥ सम्यक्त्वमाद्यमारभ्य
ततोऽप्यपूर्वं च तद्गतः ॥ ४४ ॥ स्वसंवेदनमन्यत्र ज्ञानं
स्यादनुभवाह्वयम् ॥ वैराग्यं भेदविज्ञानमित्याद्यस्तीह किं-
चनु ॥ ४५ ॥ अद्वैतेऽपि भिदा सत्ता चेतना चेतनाग-
मात् ॥ यथोपलक्षितो जीवः स्वार्थसाधोऽस्ति नान्यथा
॥ ४६ ॥ ननु चिन्मात्र एवास्ति जीवः सर्वोऽपि सर्व-
था ॥ किं तदाद्या गुणाश्चान्ये सन्ति तथापि केवल ॥
४७ ॥ सत्यमेतेऽनन्तधर्माधिरूढोऽप्येकः सचेतनः ॥ अर्थ-
जातं यतो यावत्स्यादनन्तगुणात्मकम् ॥ ४८ ॥ अपि-
ज्ञानं च तथाऽपि ज्ञानत्वं तत्परीक्षकैः ॥ वस्तुमात्रादपि
साध्यं युक्तिस्वानुभवागमात् ॥ ४९ ॥ तत्रयात्ये जी-
वस्य चारित्रं दर्शनं सुखम् ॥ ज्ञानं सम्यक्त्वमित्येते
स्युर्विशेषगुणाः स्फुटम् ॥ १५० ॥ वीर्यं सूक्ष्मोऽवगाहः
स्यादव्याबाधश्चिदात्मकः ॥ स्यादगुरुलघुसंज्ञं च स्युः

तत्र यत्रापि कात्स्न्र्ये कषायाः स्युः स्वलक्षणम् ॥ अ॥-
भावात्मको भावो जीवस्यासंयमो मतः ॥ ३५ ॥
एतद्वृत्तस्य हेतुः स्याच्छक्तिर्द्वैतेकर्मणः ॥ चारित्रमोह-
नीयस्य नेतरस्य मनागपि ॥ ३६ ॥ यौगपद्यं द्वयोरेव
कषाययोरनन्तयोः ॥ सर्वं शक्तिद्वयस्योच्चैः कर्मणोऽ-
स्य तथोदयात् ॥ ३७ ॥ अस्ति तत्रापि दृष्टान्तः
कर्मानन्तानुबन्धि यत् । घातिशक्तिद्वयोपेतं मोहनं
दृक्चारित्रयो ॥ ३८ ॥ ननु चाप्रत्याख्यानादिकर्म-
णामुदयात्क्रमात् ॥ देशकृत्स्नव्रतादीनां क्षतिः स्यात्त-
त्कथं स्मृतौ ॥ ३९ ॥ सत्यं तत्र विनाभावो बन्धस-
त्त्वोदयं प्रति ॥ द्वयोरन्यतरस्यातो विवक्षायां न दूषणम्
असिध्दत्वं भवेद्भावो नूनमौदयिको यतः ॥ व्यस्ताद्वा
स्यात्समस्ताद्वा जातः कर्माष्टकोदयात् ॥ ४१ ॥ सिध्दत्वं
कृत्स्नकर्मभ्यः पुंसोऽवस्थान्तरं पृथक् ॥ ज्ञानदर्शनस-
म्यक्त्ववीर्याद्यष्टगुणात्मकम् ॥ ४२ ॥ नेदं सिध्दत्वमत्रेति
स्यादसिध्दत्वमर्थतः ॥ यावत्संसारसर्वस्वं महानर्थास्पदं
परम् ॥ ४३ ॥ लेश्याः षडेव विख्याता भावा औदयिकाः
स्मृताः ॥ यस्माद्योगकषायाभ्यां द्वाभ्यामेवोदयोद्भवाः
॥ ४४ ॥ ११४५ इति पञ्चाध्यायी सम्पूर्णा ॥ शुभम् ॥

॥ समाप्तोऽयं ग्रन्थः ॥